

पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर बि, ए,

PANDITA KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

अष्टावक्रसंहिता ।

आत्मानुभवोपदेशवर्णनं नाम प्रथमं प्रकरणम् ।

जनक उवाच ।

कथं ज्ञानमवाप्नोति कथं मुक्तिर्भविष्यति ।
वैराग्यं च कथं प्राप्तमेतद्ब्रूहि मम प्रभो ! ॥१॥

अष्टावक्र उवाच ।

मुक्तिमिच्छसि चेत् तात ! विषयान् विषवत् त्यज ।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥१॥

सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमुत्तमम् ।
नत्वाष्टावक्रसूत्रस्य दीपिका तन्यते परा ॥ १ ॥

इह खलु सार्वज्ञानसम्पन्नः परमकारुणिकोऽष्टावक्र-मुनिः मुक्तिकामनया समुपेतं शिष्यं शमदमाद्यधि-कारस्वीकारोपदेशपूर्वमात्मतत्त्वमुपदिशति मुक्तिमिच्छसि इति ।

तात इति वात्सल्यसम्बोधने, हे शिष्य ! त्वं सर्वानर्थ-निवृत्तिं परमानन्दावाप्तिरूपां मुक्तिमिच्छसि चेत्, तर्हि विष-यान् विषवत् त्यज । यथा विषम् अनर्थहेतुत्वात् त्यज्यते तथा विषयान् देहादीन् अनर्थहेतुभूतांस्त्यज । तत्राहं ममेत्यभिमा-नमपि मा कार्षीरित्यर्थः । अनेन बाह्यपदार्थानुषङ्गत्यागोप-देशेन बाह्येन्द्रियनिग्रहरूपदमाधिकार उपदिष्टः ।

न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान्।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥२॥

अथ अन्तःकरणनिग्रहरूपशमाङ्गीकारमुपदिशति क्षमा इति। क्षमा नाम सर्वसहनं सर्वाधिष्ठानत्वमात्मधर्मः। आर्जवं नाम अविद्यारूपकुटिलसम्बन्धाभावः सोऽपि आत्मधर्मः। दया नाम निरुपाधिकं सर्वहितानुबन्धित्वं सोऽपि आत्मधर्मः। तोषो नामात्मसुखं तदपि आत्मस्वरूपम्। सत्यं नाम कालत्रयाबाध्यं स्वरूपं तदपि आत्मैव। एवंविधमात्मरूपं पीयूषवद्भज। क्षमादिकं यथा पीयूषम् अर्थहेतुत्वात् सेव्यते तथा सेव्यस्त्वेत्यर्थः। शमदमादिसाधनचतुष्टयसम्पन्नमधिकारिणं शिष्यं प्रति भगवान् अष्टावक्रो मुनिर्मुक्तिमुपदिशति ॥ १ ॥

ननु पाञ्चभौतिको देह एवात्मा। तथा च भूतानां तद्धर्माणां च त्यागो न सम्भावितः। न हि पृथिव्यादीनां स्वभावभूतो गन्धादिः कालत्रयेऽपि त्यज्यत इत्याशङ्क्य पृथिव्यादिस्वरूपस्त्वं न भवसीत्याह न पृथ्वी इति।

हे शिष्य! पृथिव्यप्तेजोवाय्वाकाशादिरूपस्त्वं न भवसि ततस्त्वमनात्मधर्मान् विषयांस्त्यजेत्यर्थः।

ननु अहं गौरः स्थूलः कृशो ह्रस्व इत्यादिप्रतीतेः पाञ्चभौतिको देह एवात्मा इत्यत आह एषाम् इति। एषां देहादीनां साक्षिणम् एव आत्मानं विद्धि साक्षात् कुरु, तथा च देहादेः साक्षी आत्मा देहादिभ्यो भिन्नः। यथा घटद्रष्टा घटाद्भिन्नस्तथेत्यर्थः।

नैयायिकाभिमतमात्मानं निराकरोति चिद्रूपं विद्धि इति। आत्मज्ञानस्य फलमाह मुक्तये इति ॥ २ ॥

यदि देहं पृथक्कृत्य चिति विश्राम्य तिष्ठसि ।
अधुनैव सुखी शान्तो बन्धमुक्तो भविष्यसि ॥३॥
न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः ।
असङ्गोऽसि निराकारो विश्वसाक्षी सुखी भव ॥४॥

आत्यन्तिकी दुःखनिवृत्तिर्मुक्तिरिति नैयायिकाः । दुःखप्रागभावपरिपालनं मुक्तिरिति प्राभाकराः । आत्महानिर्मुक्तिरिति बौद्धाः । इत्यादिमतानि निराकुर्वन्नेव आत्मज्ञानाज्जीवन्मुक्तिदशामाह यदि इति ।

हे शिष्य ! यदि त्वं देहं पृथक् कृत्य देहादिभ्यो विलक्षणं विविच्य चिति विश्राम्य चिदेकाग्रो भूत्वा तिष्ठसि, तर्हि त्वं अधुनैव इदानीं जीवनदशायामेव सुखी प्राप्तपरमानन्दः, अतएव शान्तः सुप्रसन्नमनाः बन्धमुक्तः कर्तृत्वभोक्तृत्वप्रमुखानर्थरहितो भविष्यसि इत्यर्थः ॥ ३ ॥

ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय, चिति विश्राम्यावस्थानं कथं मुक्तिरित्याशङ्क्य आत्मा वर्णाश्रमविलक्षण इत्याह न त्वम् इति । त्वं वर्णाश्रमविलक्षण इत्यर्थः ।

ननु अहं ब्राह्मण इत्यादि आनुभवप्रत्यक्षबलादात्मैव वर्णाश्रमीत्याशङ्क्याह नाक्षगोचर इति साक्षित्वात् अयं ब्राह्मण इत्यादि प्रत्ययास्तु देहगोचरा एव नतु आत्मगोचरास्तस्य, इन्द्रियग्रामागोचरत्वादित्यर्थः ।

तर्हि कीदृशोऽहमिति आशङ्क्याऽऽत्मानं निरूपयन्नेव तद्विश्रान्तिफलमनुवदति असङ्ग इति, असङ्गः सर्वोपाधिसङ्गरहितः, निराकारो विश्वसाक्षी त्वम् असि अतएव असङ्गादिरूपत्व

धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो ! ।
न कर्तासि न भोक्तासि मुक्त एवासि सर्वदा ॥५॥
एको द्रष्टासि सर्वस्य मुक्तप्रायोऽसि सर्वदा ।
अयमेव हि ते बन्धो द्रष्टारं पश्यसीतरम् ॥६॥

तव वर्णाश्रमविलक्षणत्वात् कर्मासक्तिं परिविहाय चिति विश्राम्य सुखी प्राप्तपरमानन्दो भव इत्यर्थः ॥ ४ ॥

ननु वेदोदितं कर्म विहाय चिति विश्रान्तावपि प्रत्यवाय-प्रसङ्ग इत्याशङ्क्याह धर्माधर्मौ इति ।

धर्माधर्मादयो मनोधर्मा एव, व्यापकत्वेऽपि तैः सह तव सम्बन्धो नास्तीत्यर्थः ।

कुत इत्यत आह न कर्ता इति । किं च विहितनिषिद्ध-कर्मकर्तुः धर्माधर्मादिद्वारा सुखदुःखभोक्तृत्वम्, तदपि तव नास्ति शुद्धबुद्धस्वरूपत्वात्त्वं सर्वदा मुक्त एवासि । अज्ञान-मात्रविजृम्भिते सुखदुःखे ते तु चितिविश्रान्त्यैव अज्ञान-निवृत्त्या न विजृम्भेते इत्यर्थः ॥ ५ ॥

ननु शुद्धबुद्धस्वभावस्यैवास्य नित्यमुक्तस्यात्मनो बन्धः किंनिबन्धनो यस्य निवृत्त्यर्थं विवेकिनो यतन्त इत्याशङ्क्य नित्यमुक्तस्यापि प्रातीतिकं बन्धहेतुमाह एक इति ।

हे शिष्य ! सर्वस्य द्रष्टा प्रतिशरीरम् एकः त्वम् असि, ततश्च व्यापकत्वात् सर्वदा मुक्तप्रायोऽसि । देहाध्यासवशतो बन्धे प्रतीयमानेऽपि वस्तुगत्या मुक्तोऽसीत्यर्थः ।

अयम् इति हि निश्चितम्, अयमेव ते तव बन्धो, यदि इतरं देहादिरूपं परिच्छिन्नं द्रष्टारं पश्यसि इत्यर्थः ॥ ६ ॥

अहं कर्त्तेत्यहम्मानमहाकृष्णाहिदंशितः ।
नाहं कर्त्तेति विश्वासामृतं पीत्वा सुखी भव ॥७॥
एको विशुद्धबोधोऽहमिति निश्चयवह्निना ।
प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव ॥८॥
यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् ।
आनन्दपरमानन्दः स बोधस्त्वं सुखं चर ॥९॥

पूर्वं बन्धहेतुवत् अथानर्थहेतुं वदन्नेव तन्निवृत्तिपरमानन्दप्राप्त्युपायमनुवदति अहं कर्त्ता इति।

हे शिष्य ! अहं कर्त्तेति एवंरूपो योऽहम्मानः अहमिति आत्मनि कर्तृत्वाभिमानस्वरूपो महान् कृष्णसर्पः सुखदुःखविषयी एव अहिः तेन दंशितः कवलीकृतोऽन्तःकरणात् अहं न कर्त्ता अहं अकर्त्ता आत्मा, इत्येवं रूपं विश्वासामृतं निश्चयामृतम्, पीत्वा अनुभूय सुखी भव, प्राप्तपरमानन्दो भवेत्यर्थः ॥ ७ ॥

ननु आत्मज्ञानामृतपानं किं द्वारा सुखसाधनमित्यत आह अज्ञानकाननदहनद्वारा ज्ञानाग्निः सुखसाधनमित्याह एको विशुद्धबोधोऽहम् इति ।

एकः सजातीयविजातीयस्वगतभेदरहितः, विशुद्धबोधः स्वप्रकाशः चिदात्मा अहमिति निश्चयाग्निना, अज्ञानाख्यं गहनं वनम्, प्रज्वाल्य प्रकर्षेण दग्ध्वा शोकमोहरागद्वेषप्रवृत्तिकारणाभावात् वीतशोको विगतदुःखः सन्, सुखी भव इत्यर्थः ॥ ८ ॥

ननु आत्मज्ञानेन अज्ञानकाननदाहे कृतेऽपि ज्ञानस्य प्रय-

मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि।
किंवदन्तीह सत्येयं या मतिः सा गतिर्भवेत्॥१०॥

ननु अज्ञानादनिवृत्तेः वीतशोकः कथं स्यादित्याशङ्क्य प्रपञ्चस्य रज्जुभुजङ्गतुल्यत्वात् अज्ञानादिनिवृत्तौ दुःखहेतोरभावाद्वीतशोकता स्यात् एव इत्याह यत्र इति।

यत्र बोधे, इदं विश्वं रज्जुसर्पवत् कल्पितम् अधिष्ठानाज्ञानकल्पितं भाति, स बोधः चिदात्मा त्वं सुखं चर। यथा स्वप्नदशायामज्ञानकल्पितं व्याघ्रादिकं पश्यति, जाग्रद्बोधे निवर्त्य सुखं चरति तद्वदित्यर्थः।

ननु दुःखहेतुप्रपञ्चनिवृत्तौ दुःखाभावमात्रं स्यात्सुखं तु कथं स्यादित्याशङ्क्य स्वभावत एव त्वं नित्यानन्दानन्दस्वरूप इत्याह आनन्दपरमानन्द इति। आनन्देभ्यो मनुष्यलोकदेवलोकानन्देभ्यः परम उत्कृष्टः आनन्दस्त्वमित्यर्थः। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः॥ ॥

ननु सर्वं रज्जुसर्पवत् कल्पितं स्वभावतस्त्वानन्द एवात्मेति चेत्तर्हि बन्धमोक्षावात्मनः किन्निबन्धनावित्याशङ्क्याह मुक्ताभिमानी इति।

हि निश्चितं मुक्ताभिमानी मुक्त अपि च बद्धाभिमानी बद्धः, अत्र किंवदन्तीं प्रमाणयति किंवदन्ती इति। "या मतिः सा गतिर्भवेद्" इह इयं प्रसिद्धा किंवदन्ती विद्वज्जनश्रुतिः सत्या यथार्थिताऽर्था। "तं विद्याकर्मणी समारभेते पूर्वप्रज्ञा च" इति श्रुतिपरिगृहीतत्वात्। "यं यं वापि स्मरन् भावम्" इत्यादि स्मृतिपरिगृहीतत्वाच्च। तथा चाभिमानिकावेव बन्धमोक्षौ न तु वास्तवावित्यर्थः पूर्वमुक्तोऽप्ययमर्थो दुर्बोधत्वात् पुनः पुनः शिष्यबोधार्थमुच्यत इत्यर्थः॥ १०॥

आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः ।
असङ्गो निःस्पृहः शान्तो भ्रमात्संसारवानिव ॥११॥
कूटस्थं बोधमद्वैतमात्मानं परिभावय ।
आभासोऽहं भ्रमं मुक्त्वा भावं बाह्यमथान्तरम् ॥१२॥

ननु जीवात्मनः पारमार्थिकावेव बन्धमोक्षौ इति तार्किकाद्याशङ्कामपाकर्तुमाह। आत्मा इति।

आत्मा भ्रमात् देहादौ आत्मतादात्म्यभ्रमात् संसारवानिव प्रतीयते न तु वस्तुतः संसारी।

अत्र दश हेतूनाह साक्षी इति। कर्त्रहङ्कारादेः साक्षी न तु कर्त्ता, विभुः विविधं भवति यस्मादिति विभुः सर्वाधिष्ठानम्, पूर्णः व्यापकः एकः सजातीयविजातीयस्वगतभेदरहितः, मुक्तः वस्तुगत्या मायातत्कार्यातीतः, चित् स्वप्रकाशचैतन्यरूपः, अक्रियः चेष्टारहितः असङ्गः सर्वसम्बन्धशून्यः, "असङ्गो ह्ययं पुरुषः" इति श्रुतेः। निःस्पृहः विषयाभिलाषरहितः शान्तः प्रवृत्तिनिवृत्तिदेहाद्यन्तःकरणधर्मरहितः। तस्माद्वस्तुतो न संसारीत्यर्थः ॥ ११ ॥

अहं परिच्छिन्नो ममेदं देहादिकम् सुखी दुःखी चाहमिति भ्रमस्य अनादिपरम्परागतस्य सकृद्भावनया निवर्तयितुमशक्यत्वात् "आवृत्तिरसकृत् उपदेशात्" इति न्यायसूचनाय। पुनः पुनरद्वैतात्मभावनां विजातीयभावनानिवृत्तिपुरःसरामुपदिशति कूटस्थम् इति।

हे शिष्य ! आभासोऽहम् अहङ्कारोऽहमिति भ्रमं मुक्त्वा, बाह्यं ममेदं देहादिकमिति बाह्यपदार्थविषयं भावं तथा-

देहाभिमानपाशेन चिरं बद्धोऽसि पुत्रक ! ।
बोधोऽहं ज्ञानखड्गेन तन्निःकृत्य सुखी भव ॥१३॥
निःसङ्गो निष्क्रियोऽसि त्वं स्वप्रकाशो निरञ्जनः
अयमेव हि ते बन्धः समाधिमनुतिष्ठसि ॥१४॥

वनां मुक्त्वा अथ च आन्तरं भावं सुखी दुःखी मूढोऽह-मिति आन्तरपदार्थविषयं भावं भावनां मुक्त्वा अकर्त्तारं कूटस्थम् असङ्गबोधस्वरूपम् अद्वैतमात्मानं परि समन्तात् व्यापकं भावय इत्यर्थः ॥ १२ ॥

अनादिरयं देहाभिमानः सकृद्भावनया न निवर्त्तत इति पुनः पुनर्ज्ञानखड्गेन तं निःकृत्य सुखी भवेत्याह देहाभिमान-पाशेन इति ।

पु[illegible] पुत्रक ! हे शिष्य ! त्वं देहोऽहमिति अभिमान[illegible]शेन चिरं बहुकालं बद्धोऽसि अतो बोधोऽहं चिद्रूपोऽहमिति ज्ञानख[illegible]न पुनः पुनः तं पाशम् नितरां छित्वा सुखी भव ॥[illegible]३ ॥

[illegible]त्तवृत्तिनिरोधरूपः समाधिरेव केवलो बन्धनिवृत्तिहेतु-[illegible]तत्स्वमतमपाकर्त्तुमाह । निःसङ्ग इति ।

हि[illegible] हे शिष्य ! त्वं वस्तुतो निःसङ्गः सर्वसम्बन्धशून्योऽसि, तथा क्रियारहितोऽसि ।

अत्र हेतुमाह स्वप्रकाशो निरञ्जन इति । निष्क्रियस्य समाध्यनुष्ठानं यत् अयमेव हि निश्चितं बन्धः तथा च ज्ञानातिरिक्तोपायानुष्ठानमात्रं प्रत्युत बन्ध एव इत्यर्थः ॥१४॥

तदेवमात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः, अथ

त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः ।
शुद्धबुद्धस्वरूपस्त्वं मा गमः क्षुद्रचित्तताम् ॥१५॥
निरपेक्षो निर्विकारो निर्भरः शीतलाशयः ।
अगाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः ॥१६॥

परिपूर्णे शुद्धबुद्धात्मनि विपरीतधियमुच्छादयन्नेव चिन्निष्ठामुपसंहरति श्लोकद्वयेन । त्वया इति ।

हे शिष्य ! इदं विश्वं त्वया व्याप्तं कनकेन इव कटककुण्डलादिकं यथा तथा इदं विश्वं त्वयि प्रोतं मृदीव घटशरावादिकं हे शिष्य ! त्वं यथार्थतः परमार्थतः शुद्धः अविद्यातत्कार्यप्रपञ्चातीतः बुद्धः स्वप्रकाशः चिद्रूपोऽसि एवं च, "सर्वगन्धः सर्वरसो न इति न इति" इति श्रुतिद्वयानुसारेण उक्ताभ्याम् अध्यारोपापवादाभ्यां निःप्रपञ्चमात्मतत्त्वमुपदिष्टं भवति। हे शिष्य ! परिपूर्णशुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतचित्तवृत्तिं मा गमः मा कार्षीः इत्यर्थः ॥१५॥

प्रतीयमानाः षडूर्मयः षड्भावविकाराश्च न त्वद्गताः किं तु तद्विलक्षण इत्याह । निरपेक्ष इति ।

हे शिष्य ! त्वं निरपेक्षः अशनायापिपासादिषडूर्मिधर्मातीतः । तथा निर्विकारः "जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यति" इत्येवंविधाः यास्कादिप्रोक्ताः षड्भावविकारास्तद्धर्मरहितस्त्वमित्यर्थः ।

तर्हि कीदृशोऽहमित्यत आह, निर्भर इति । निर्भरः चिद्घनरूपः शीतलः सुखरूपः आमुक्तिसमयमभिव्याप्य शेते तिष्ठतीति आशयः, अगाधा अगम्या अतलस्पर्शा अपरिच्छिन्ना

साकारमनृतं विद्धि निराकारं तु निश्चलम् ।
एतत्तत्त्वोपदेशेन न पुनर्भवसम्भवः ॥१७॥
यथैवादर्शमध्यस्थे रूपेऽन्तः परितस्तु सः ।
तथैवास्मिन् शरीरेऽन्तः परितः परमेश्वरः ॥१८॥

बुद्धिः स्वरूपं [illegible] तस्य तद्रूपः, अशुद्धः अविद्याजनितक्षोभरहितस्त्वं वस्तुतो[illegible]ऽसि, अतस्त्वं क्रियामात्ररहितचिन्मात्रनिष्ठो भव इत्यर्थः ॥ १६ ॥

"विषय[illegible]न् विषवत् त्यज सत्यं पीयूषवद्भज" इति मोक्षोपायः प्रथम[illegible]श्लोके समुपदिष्टः परन्तु विषयाणां विषतुल्यत्वे सत्यात्म[illegible]नः पीयूषतुल्यत्वे च हेतुर्नोक्तस्तत्र हेतुं वदन्नेव षोडशश्लोके [illegible]पदिष्टो मोक्षहेतुश्चिदात्मा च साध्यस्तं विश्वं समन्ततो व्याप्य अवस्थितो मुकुर इव स्वाध्यस्तं शरीरादि इति तद्भावावस्तिरेव परमपुरुषार्थं इत्युपपत्तिमुखेन प्रकटयार्थं [illegible]ति श्लोकत्रयेण। "अथ संग्रहश्लोकाः" साकार इत्यादिना साकारम् इति।

हे शिष्य! साकारं शरीरादिकम् अनृतं मिथ्याभूतं विद्धि अतस्तत् विषवत् त्यजेत्यर्थः; निराकारम् आत्मतत्त्वं निश्चलं कालत्रयावस्थायि विद्धि, सर्वसाक्षित्वात् "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतेश्च। अत एतत्तत्त्वस्य शिष्यायास्य उपदेशेन उपदिश्यमानेन तत्र एव विश्रान्त्यवस्थानेन न पुनर्भवस्य मोक्षस्य सम्भवः सिद्धिरित्यर्थः ॥१७॥

अथ वर्णाश्रमधर्मवत्स्थूलशरीरात् पुण्यापुण्यधर्मवल्लिङ्गशरीरादिवत्वं परिपूर्णं चैतन्यं दृष्टान्तं निरूपयति यथैव इति।

एकं सर्वगतं व्योम बहिरन्तर्यथा घटे ।
नित्यं निरन्तरं ब्रह्म सर्वभूतगणे तथा ॥१९॥

अथ शिष्योक्तमात्मानुभवोल्लासनामकं द्वितीयं प्रकरणम् ।

अहो निरञ्जनः शान्तो बोधोऽहं प्रकृतेः परः ।
एतावन्तमहं कालं मोहेनैव विडम्बितः ॥१॥

यथैवादर्शो प्रतिबिम्बिते शरीरादौ अन्तः मध्ये परितः बहिश्च स आदर्शो व्याप्य वर्त्तते । तथैव स्वाध्यस्ते अस्मिन् स्थूले शरीरे अन्तः परितश्च परमेश्वरः चिदात्मा व्याप्य स्थितः, तथा च "यत्र विश्वमिदं भाति कल्पितं रज्जुसर्प-वत्" इत्यादि सर्वोऽपि प्रकरणार्थः संक्षेपतः सूचितः ॥१८॥

आदर्शदृष्टान्ते परिच्छिन्नत्वादिभ्रमापत्तिः, स्वाध्यस्ते शरीरान्तर्वर्त्तित्वं च न अदृष्टमतो घटाकाशदृष्टान्तेन बाह्या-भ्यन्तरव्यापकत्वमाह एकं सर्वगतम् इति ।

यथा सर्वगतम् एकं नित्यम् व्योम घटपटादौ बहिरन्तश्च वर्त्तते तथा नित्यम् अविनाशि ब्रह्म सर्वभूतगणे बहिरन्तरं सर्वदा वर्त्तते इत्यर्थः । "एष त आत्मा सर्वान्तर" इति श्रुतिः । अतश्च बोधोऽहमिति ज्ञानखड्गेन देहाद्यध्यासपाशं निःछिद्य सुखी भवेत्यर्थः ॥ १९ ॥

इति आत्मानुभवोपदेशनामकं प्रथमं प्रकरणं समाप्तम् ।

इत्थं गुरुवाक्पीयूषस्वादानुभवमात्मनः ।
आविश्चकार साश्चर्यं शिष्यो निजगुरुं प्रति ॥१॥

तत्र तावच्चिदच्छविद्रूपात्मानुभवमाविष्कुर्वन्नेव गुरुकृतोप-

यथा प्रकाशयाम्येको देहमेनं तथा जगत्।
अतो मम जगत्सर्वमथवा न च किञ्चन॥

कारणापगमाय प्राचीनसंस्कारवशाद्बाधितानुवृत्त्या प्रतीतस्य मोहविजृम्भणस्य कारणमाविष्करोति अहो इति।

अदृष्टश्रुतस्यानुभवात् अहो इत्याश्चर्यं, अहं निरञ्जनः सर्वोपाधिविनिर्मुक्तः, शान्तः सर्वविकारातीतः, प्रकृतेः परः मायातत्कारणसंशून्यो बोधः, स्वप्रकाशचिद्रूप इत्यर्थः।

गुरूपकारख्यापनाय मोहविडम्बनमनुस्मरति एतावन्तम् इति एतावन्तं गुरूपदेशावधिकालं मोहेन देहात्मविवेकेन विडम्बितः एव साम्प्रतं तु श्रीगुरुप्रसादात् आत्मानन्दं अवो-ऽस्मीति विवक्षितोऽर्थः॥ १॥

पूर्वकालीनं मोहविडम्बनमुक्तं सम्प्रति गुरुप्रसादात् मम देहात्मविवेकोऽस्तीति सोपपत्तिकमाह यथा इति।

अहं यथा एक एव जगत् प्रकाशयामि, तथा एव एनं स्थूलं देहं प्रकाशयामि, तथा च, देहोऽनात्माऽप्रकाशत्वाद्यथा जगत्तद्वदित्यर्थः।

कदापि जगदादिदेहात्मनोः सम्बन्ध इत्याशङ्क्य युक्ति-विचारादाध्यासिकः सम्बन्धः, परमार्थगत्या च न कश्चित् सम्बन्धः इत्याह अतो मम इति। अतो दृश्यत्वात् सर्वं देह-प्रमुखं जगत् मम मदीयं मयि अध्यस्तमित्यर्थः, च व्यवहारे, अथवा परमार्थविचारे, किं च न किमपि देहादिकं, मम न च नैव मयि अध्यस्तमित्यर्थः। तदेवमध्यारोपापवादाभ्यां प्रकृतेः परो बोधोऽहमित्येव अत्र स्फुटीकृतम्॥ २॥

सशरीरमहो विश्वं परित्यज्य मयाधुना ।
कुतश्चित् कौशलादेव परमात्मा विलोक्यते ॥३॥
यथा न तोयतो भिन्नास्तरङ्गाः फेनबुद्बुदाः ।
आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतम् ॥४॥
तन्तुमात्रो भवेदेव पटो यद्वद्विचारितः ।
आत्मतन्मात्रमेवेदं तद्वत् विश्वं विचारितम् ॥५॥

ननु लिङ्गदेहात् कारणदेहाच्च विवेकाभावे कथं प्रत्यक्चितिरिवात्मबोध इत्याशङ्क्य, ततोऽपि विवेकजमात्मानुभवमाह सशरीरम् इति ।

अहो इति आश्चर्ये, अधुना सशरीरं लिङ्गशरीरकारणशरीरसहितम् विश्वं परित्यज्य विचारतः पृथक्कृततया निश्चित्य, कुतश्चित् आत्माचार्योपदेशप्रकाशात्, कौशलात् चातुर्यात् एव परमश्रेष्ठ आत्मा मया विलोक्यते, नान्यः परमात्मावलोकनोपाय इत्यर्थः ॥ ३ ॥

सशरीरविश्वस्य पृथक्कृततया परित्यागे, तं दृष्टान्तं निरूपयति यथा न तोयत इति ।

यथा तरङ्गाः फेनबुद्बुदाः च, न तोयतो भिन्नाः तद्रूपानुगतत्वात्, तथा आत्मविनिर्गतं आत्मनः सञ्जातं आत्मोपादानकम्, विश्वम् आत्मनो न भिन्नम् एवं च तोयतरङ्गादिषु जलं यथा अनुस्यूतमनुगतम्, तथा अनुस्यूतचिद्रूपोऽहं विश्वाधिष्ठानभूतो न मत्तोऽन्यत् विश्वमित्यर्थः ॥ ४ ॥

दृष्टान्तान्तरेण आत्मरूपतया सर्वाविशेषत्वं निरूपयति तन्तुमात्र इति ।

यथैवेक्षुरसे क्लृप्ता तेन व्याप्तैव शर्करा ।
तथा विश्वं मयि क्लृप्तं मया व्याप्तं निरन्तरम् ॥६॥
आत्माज्ञानात् जगत् भाति आत्मज्ञानान्न भासते ।
रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते न हि ॥७॥

स्थूलदृष्ट्या तन्तुवैलक्षण्येन प्रतीयमानोऽपि पटो विचारितः विचारवीक्षितः सन्, यद्वत् यथा तन्तुमात्रो भवेत् अस्ति यद्वत् तथा इदं विश्वं स्थूलदृष्ट्या ब्रह्मवैलक्षण्येनापि प्रतीयमानम्, युक्त्या विचारितं सत् आत्मतन्मात्रमेव आत्मसत्तामात्रात्मकमेव एतेन तन्तुः स्वसत्तया यथा पटेऽनुगतस्तथा आत्मापि स्वसत्तया अधिष्ठानभूतो विश्वस्मिन्ननुगत इत्यर्थः ॥ ५ ॥

आत्मनैव सर्वं व्याप्तमित्यत्र दृष्टान्तान्तरमाह तथैवेति ।

यथैव इक्षुरसे क्लृप्ता अध्यस्ता, शर्करा तेन मधुरेण व्याप्तैव सर्वापि व्याप्ता तथा एव मयि नित्यानन्दस्वरूपे क्लृप्तं अध्यस्तम् इदं विश्वं मया नित्यानन्देन निरन्तरं बाह्याभ्यन्तरं व्याप्तम्, तस्मात् विश्वमानन्दात्मस्वरूपम् एव इत्यर्थः । तदेव-मस्ति भाति प्रियमित्येवंरूपेण अहमेव सर्वत्र अवस्थित इति श्लोकद्वयविवक्षितोऽर्थः ॥ ६ ॥

विश्वं चिदात्मनो न भिन्नम्, तर्हि केन कारणेनेदं भासते, केन च कारणेन न भासते इत्याशङ्क्याह आत्माज्ञानात् इति ।

आत्मनः अज्ञानात् जगत् भाति, तथा आत्मन अधि-ष्ठानस्य ज्ञानात् न भासते ।

अधिष्ठानाज्ञानात् अध्यस्तस्य भानेऽधिष्ठानज्ञानाच्च न भाने-ऽत्र प्रसिद्धदृष्टान्तमाह रज्ज्वज्ञानात् इति । हि यथा रज्ज्वा

प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः।
यदा प्रकाशते विश्वं तदाहंभास एव हि ॥८॥
अहो विकल्पितं विश्वमज्ञानात् मयि भासते।
रूप्यं शुक्तौ फणी रज्जौ वारि सूर्य्यकरे यथा ॥९॥
मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति।
मृदि कुम्भो जले वीचिः कनके कटकं यथा ॥१०॥

स्वरूपस्य अज्ञानात् अहिः सर्पो भाति तज्ज्ञानात् रज्जुज्ञानात् न भासते ॥ ७ ॥

ननु आत्माज्ञाने सति आत्मप्रकाशाभावात् जगत् कथं भासते इत्याशङ्क्य स्वरूपेणात्मप्रकाशादेवेत्याह प्रकाश इति।

प्रकाशो नित्यबोधः मे मम निजं स्वाभाविकं स्वरूपम् अहं ततः प्रकाशात् अतिरिक्तः भिन्नो नास्मि, अतो मम यदा विश्वं प्रकाशते, तदा अहंभासात् आत्मप्रकाशात् एव भासते, स्वरूपेणात्म चेत् भासकं तदा कथमज्ञानमिति चेत् नैवं, न हि स्वरूपेणात्माऽज्ञानविरोधि, किन्तु भासकमेव अन्यथा अज्ञस्य सिद्धिरेव न स्यात् किञ्च आत्मस्वरूपप्रकाशाभावे आत्मनोऽपि असत्त्वप्रसक्तिर्जगदान्ध्यप्रसङ्गश्च तस्मात् यदा विश्वं प्रकाशते तदा आत्मस्वरूपप्रकाशादेवेति भावः ॥ ८ ॥

स्वप्रकाशेऽपि मयि आत्मनि अज्ञानवशादिदं भासत इति सदृष्टान्तमाह अहो इति।

स्वप्रकाशेऽपि मयि अज्ञानाद् विकल्पितं रचितं अखिलं विश्वं मयि भासते अहो आश्चर्यमिदम्, यथा शुक्त्यादौ रूप्यादिकं भासते तद्वदित्यर्थः ॥ ९ ॥

अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे ।
ब्रह्मादिस्तम्बपर्य्यन्तं जगन्नाशेऽपि तिष्ठतः ॥११॥
अहो अहं नमो मह्यमेकोऽहं देहवानपि ।
क्वचिन्न गन्ता नागन्ता व्याप्य विश्वमवस्थितः॥१२

नतु मायाविकारत्वात् तत्रैव विश्वमुत्पद्यते तत्रैव ला मेति, न तु चैतन्यात्मनि इति सांख्यमतमपाकर्त्तुमाह मत्त विनिर्गतम् इति ।

इदं विश्वं मत्त एव विनिर्गतम्, मयि एव लयमेष्य प्राप्स्यति, यथा मृदादौ कुम्भादिकं तद्वदित्यर्थः । न चा प्रमाणाभाव इति शङ्कनीयं "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति" इति श्रुतेः ॥ १० ॥

ननु ब्रह्म चेज्जगदुपादानकारणं तर्हि तस्य विकारित्वा मृदादिवद्विनाशित्वापत्तिरित्याशङ्क्याह अहो इति ।

अहो आश्चर्य्यरूपोऽहं यस्य मम सर्वोपादानभूतस्यापि विनाशो नास्ति, न च उपादानत्वे सुवर्णादिवद्विनाशित्वापत्तिः सुवर्णादिवत् विकारित्वानङ्गीकारात् विवर्ताधिष्ठानत्वेन उपादानत्वस्वीकारात् । अतएव सर्वेषकार्य्योपादानत्वात् अविनाशित्वात्तस्मात् मह्यं नमः । ब्रह्मादिदेवतावत् प्रकर्ष विनाशशङ्कां निराकरोति । ब्रह्मादिस्तम्बपर्य्यन्तं यत् जगत् तस्य नाशेऽपि तिष्ठतः प्रलयेऽपि स्थितिमतो यस्य मे विनाशो नास्तीत्यर्थः । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः ॥ ११ ॥

ननु आत्मा सुखदुःखावच्छेदकदेहवान् नाना तथा आत-

अहो अहं नमो मह्यं दक्षो नास्तीह मत्समः।
असंस्पृश्य शरीरेण येन विश्वं चिरं धृतम् ॥१३॥
अहो अहं नमो मह्यं यस्य मे नास्ति किञ्चन।
अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरम् ॥१४॥

कूटस्थरूपत्वात् तत्तद्गमनागमनवान् इत्याशङ्क्याह अहो अहम् इति।

अहो आश्चर्यरूपः अहम्, आश्चर्यरूपाय मह्यं नम इत्यर्थः।

आश्चर्यरूपमेवाह एकोऽहम् इति नानासुखदुःखावच्छेदकदेहवानपि अहमेक एव यथा नाना सकम्पनिष्कम्पत्वावच्छेदकजलोपाधिमानपि भानुरेक एवेत्यर्थः।

क्वचित् इति विश्वं व्याप्यावस्थितः परिच्छिन्नाहङ्कारविलक्षणोऽहम्, क्वचित् अपि न गन्ता कुतोऽपि नागन्ता एवेत्यर्थः ॥१२॥

ननु आत्मनः निःसङ्गत्वं कथं, शरीरसंसर्गितया जगद्धारकत्वादित्याशङ्क्याह अहो अहम् इति।

प्रथमपादार्थः पूर्ववदिति कारणात् मत्समो दक्षो अनल्पकार्यविधानचतुरः कोऽपि नास्ति येन हेतुना शरीरेण असंस्पृश्य सूत्रपिण्डेनोक्त अवष्टम्भेनैव, चिरं बहुकालम्, विश्वं स्थावरजङ्गमम्, मया धृतम् ॥१३॥

ननु अहङ्कारस्य न जगद्धारकत्वम्, अहङ्कारस्यैव मिथ्यादेहादिधारकत्वादित्याशङ्क्याह अहो अहम् इति।

अहो आश्चर्यरूपः अहं, तस्मै मे नमः। यस्य मे सम्बन्धि, परमार्थतया किञ्चन किमपि नास्ति, परमार्थतो द्वितीय-

ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवम् ।
अज्ञानाद्भाति यत्रेदं सोऽहमस्मि निरञ्जनः ॥१५॥
द्वैतमूलमहो दुःखं नान्यत् तस्यास्ति भेषजम् ।
दृश्यमेतत् मृषा सर्वं एकोऽहं चिद्रसोऽमलः ॥१६॥

खेवाभावात्, अथवा यत् यावत् वाङ्मनसगोचरं तावत् सर्वं यस्य मे मम सम्बन्धि मिथ्यातादात्म्यसम्बन्ध, सुवर्णकुण्डलादिवदित्यर्थः। अतएव सर्वसम्बन्धित्वासम्बन्धित्वाभ्यामाश्चर्यरूपाय मह्यं नम इत्यर्थः ॥ १४ ॥

ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात् कथं मिथ्यातादात्म्यसम्बन्धो जगदात्मनोरित्याशङ्क्याह ज्ञानं ज्ञेयम् इति।

ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रितयं त्रिपुटीरूपं सर्वं वास्तवं पारमार्थिकं नास्ति। यत्र मयि इदं त्रितयम् अज्ञानात् अनिर्वचनीयाज्ञानात् मिथ्यातादात्म्येनाध्यस्तं भाति। अतएव वस्तुगत्याऽहं निरञ्जनः प्रपञ्चसम्बन्धशून्योऽस्मि इत्यर्थः ॥ १५ ॥

ननु निरञ्जनस्य कथं दुःखसम्बन्ध इत्याशङ्क्य द्वैतभ्रान्तिमूलक एवासौ न तु वास्तव इत्याह द्वैतमूलम् इति।

अहो आश्चर्यं निरञ्जनस्याप्यात्मनः द्वैतमूलं दुःखं द्वैतभ्रमात् दुःखाभासो न तु वास्तवं दुःखमित्यर्थः।

दुःखाभासमहाव्याधेः किं भेषजमित्याशङ्क्याह नान्यत् इति। अमलो मायातत्कार्यातीतः चिद्रसः चिन्मात्रस्वरूपः एकोऽहम्, एतत् प्रतीयमानं सर्वं दृश्यं जड़जातं मृषा मिथ्या

बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मया।
एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम ॥१७॥
न मे बन्धोऽस्ति मोक्षो वा भ्रान्तिः शान्ता निराश्रया।
अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितम्॥१८॥

न पारमार्थिकमिति बोधात् अन्यत् तत्र त्रिविधदुःखाब्धेः लेशश्च नास्ति इत्यर्थः ॥ १६ ॥

नन्वयं द्वैतप्रपञ्चाभासः, किन्निमित्तः किमुपादानश्च इत्याशङ्क्याह बोधमात्र इति।

बोधमात्रः चिदेकस्वरूपः अहम् एव पारमार्थिकः मया सर्वोपादानभूतेन कर्त्रा अज्ञानात् अधिष्ठानाज्ञानरूपनिमित्ता-दहङ्कारप्रमुख उपाधिः द्वैतप्रपञ्चः कल्पितः।

एवं विचारस्य फलमाह एवम् इति एवं नित्यं विमृशतो विचारयतो मम, निर्विकल्पे निरस्तद्वैते स्वरूपचैतन्ये, स्थितिः सञ्जाता ॥ १७ ॥

ननु स्वरूपचैतन्यप्राप्तिरूपा मुक्तिः प्रागुक्तविचारजन्या चेत् तदा मुक्तेर्विनाशापत्तिः, जन्यभावस्य विनाशित्वनियमात् विचाराजन्या चेत् तदा विचाररहितानामपि मोक्षापत्तिरित्याशङ्क्याह न मे इति।

वस्तुतो मे मम बन्धो नास्ति, वा न च मोक्षोऽपि अस्ति, नित्यचिद्रूपत्वात्।

तर्हि शास्त्रविचारस्य किं फलमित्याशङ्क्य, भ्रान्तिनिवृत्ति-रेव तत्फलमित्याह अहो मयि इति। अहो आश्चर्यम्, मयि स्थितम् अपि विश्वम्, वस्तुतः, कालत्रयेऽपि, मयि न स्थितम्

सशरीरमिदं विश्वं न किञ्चिदिति निश्चितम् ।
शुद्धचिन्मात्र आत्मा च तत्कस्मिन् कल्पनाधुना॥१९॥
शरीरं स्वर्गनरकौ बन्धमोक्षौ भयं तथा ।
कल्पनामात्रमेवैतत् किं मे कार्यं चिदात्मनः ॥२०॥

इति विचारतोऽपि भ्रान्तिः एव शान्ता, न तु परमानन्दावाप्तिर्जनिता, आत्मनः सर्वदा परमानन्दरूपत्वात्, कीदृशी भ्रान्तिः, निराश्रया उक्तविचाराज्ञानस्य नष्टत्वात् निर्मूला इत्यर्थः ॥ १८ ॥

ननु अधिष्ठानस्य उपादानस्य सत्वात् मुक्तेष्वपि प्रपञ्चोदयः स्यादित्याशङ्क्याह सशरीरम् इति ।

सशरीरं शरीरसहितम्, इदं विश्वम्, न किञ्चित् सत्यं नापि असत्यम् इति निश्चितम्, "नेह नानास्ति किञ्चन" इति श्रुतेः, आत्मा च चिन्मात्रः शुद्धः मायामलशून्यः, तत् तस्मात् कारणात्, अधुना अज्ञाननिवृत्तौ सत्याम् कस्मिन् अधिष्ठाने, विश्वकल्पना स्यात् न कस्मिन् अपि इत्यर्थः ॥ १९ ॥

ननु सर्वस्य प्रपञ्चस्य अवास्तवत्वे, वर्णजात्याश्रयं शरीरमपि अवास्तवमेवेति शरीरविशेषमधिकृत्य प्रवर्त्तमानं विधिनिषेधशास्त्रमपि अवास्तवं स्यात्, तथा च, तद्बोधितस्वर्गनरकयोरपि अवास्तवत्वात् स्वर्गादावनुरागो, नरकादिभ्यश्च भयम् , न स्यात्, किं च शास्त्रबोध्यौ बन्धमोक्षावपि वास्तवौ न स्यातामित्याशङ्काद्वयं दृष्टापत्त्या परिहरति शरीरम् इति ।

शरीरादिकमेव एतत् कल्पनामात्रमेव, चिदात्मनः सच्चिदानन्दस्वरूपस्य मम एतैः शरीरादिभिः किं कार्य्यम्, न किमपि

अहो जनसमूहेऽपि न द्वैतं पश्यतो मम ।
अरण्यमिव संवृत्तं क्व रतिं करवाण्यहम् ॥२१॥
नाहं देहो न मे देहो जीवो नाहमहं हि चित् ।
अयमेव हि मे बन्ध आसीत् या जीविते स्पृहा ॥२२॥

कार्यं साध्यम् । विधिनिषेधादिकं तु अविद्यावन्तमेव अधिकृत्य प्रमाणमित्यर्थः ॥ २० ॥

स्वर्गादिभिः किं मे कार्यमिति प्रागुक्तम् । अथ इहलोकेन अपि मे कार्यं नास्ति इत्याह अहो जनसमूह इति ।

न द्वैतं पश्यतो मम अहो इत्याश्चर्यं, जनसमूहेऽपि अरण्यमिव संवृत्तं सञ्जातम् । तस्मात् अहं मिथ्यात्वे क्व रतिं प्रीतिं करवाणि न क्वापि इत्यर्थः ॥ २१ ॥

ननु शरीरस्य अहन्ममतास्पदतया अनुरागविषयत्वादहङ्कारस्य अपि अहन्तास्पदतया अनुरागविषयत्वात् तत्र स्पृहा स्यादित्याशङ्क्याह नाहम् इति ।

अहं देहो न जड़त्वात् न अपि मे देहः, मम निःसङ्गत्वात्, जीवः अहङ्कारो नाहम् । तस्य कर्तृत्वात् आत्मनश्चाकर्तृत्वात् ।

कस्तर्हि त्वमित्याशङ्क्याह अहं हि चिद् इति चित्स्वरूप एव अहम् इत्यर्थः ।

कुतस्तर्हि विविदिषामपि जीविते स्पृहा इत्याशङ्क्याह अयमेव हि इति । या जीविते स्पृहा, अयमेव हि मे बन्धः प्राक् आसीत्, जीवनार्थं हि पुमान् सुवर्णहरणादिकमपि करोतीति जीवितेच्छा बन्धः, बन्धहेतुत्वात् इदानीं तु सच्चिदानन्दानुभवशालिनो मम अनङ्गस्य प्राणानुवृत्तमात्ररूपे जीवितेऽपि स्पृहा नास्ति इत्यर्थः ॥ २२ ॥

अहो भुवनकल्लोलैर्विचित्रैर्द्राक् समुत्थितम् ।
मय्यनन्तमहाम्भोधौ चित्तवाते समुद्यते ॥२३
मय्यनन्तमहाम्भोधौ चित्तवाते प्रशाम्यति ।
अभाग्यात् जीववणिजो जगत्पोतो विनश्वरः ॥२४
मय्यनन्तमहाम्भोधावाश्चर्यं जीववीचयः ।
उद्यन्ति घ्नन्ति खेलन्ति प्रविशन्ति स्वभावतः ॥२५॥

अथ स्वस्य सर्वाधिष्ठानत्वं पश्यन्नाह अहो इति ।

अहो आश्चर्यं अनन्तमहाम्भोधौ मयि, चित्तवाते समुद्यते समुत्पन्ने सति विचित्रैः नानाविधैः भुवनकल्लोलैः भुवनरूपैस्तरङ्गैः द्राक् अत्यर्थं समुत्थितम् उदयो लब्धः यथा वारिधेस्तरङ्गास्तथा मत्तो भुवनानि वस्तुतो न भिन्नानि इत्यर्थः ॥२३॥

अनन्तमहाम्भोधौ सर्वव्यापकचित्समुद्रे मयि चित्तवाते सङ्कल्पविकल्पशालिनि मनोमारुते प्रशाम्यति सति अहङ्कादिरहिते सति जीववणिजो जीवात्मलक्षणस्य वाणिज्यस्य कर्त्तुः अभाग्यात् प्रारब्धक्षयात् जगत्पोतः शरीरादिनौकासमूहः विनाशवान् भवति इत्यर्थः ॥ २४ ॥

अथ बाधितानुवृत्त्या स्वस्मिन् सर्वजीवव्यवहारं पश्यन्नाह मयि इति ।

आश्चर्यं, निष्क्रिये निर्विकारे मयि अनन्तमहाम्भोधौ जीवा एव वीचयः तरङ्गाः उद्यन्ति अभिव्यक्ता भवन्तीव मिथः परस्परं घ्नन्ति ताडयन्ति इव शत्रुभावाभ्यासात् अन्ये च मिथः

न्ति इव भिन्नभावाध्यासात्, अविद्याकामकर्मक्षये सति च मयि विशन्ति इव कस्मात् स्वभावतः अविद्याकामकर्मस्वभाववशात् उत्पत्त्यादिकं प्राप्नुवन्ति, स्वभावतः स्वस्य चिद्रूपस्य आत्मरूपेण स्वभावतः तत्रैव प्रविशन्ति घटाकाशादय इव महाकाशे इति विवेकः॥ २५॥

द्वितीयेऽस्मिन् प्रकरणे शिष्येणानुभवस्थितिः।
निवेदिता गुरोस्तुष्ट्यै ब्रह्माश्चर्यपुरःसरा॥

इति शिष्योक्तात्मानुभवोल्लासपञ्चविंशतिकं नाम
द्वितीयं प्रकरणं समाप्तम्।

शिष्यानुभवपीयूषे भ्रान्तेऽपि कल्पनावशात्।
तद्विज्ञानपरीक्षार्थं शिष्यमाह गुरुः पुनः॥

अथ शिष्यं प्रति आक्षेपद्वारोपदेशकं नाम तृतीयं प्रकरणम्।

अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः।
तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः॥१॥

विज्ञानानुभवमपि स्वशिष्यं व्यवहारस्थितं दृष्ट्वा तद्विज्ञानपरीक्षार्थं तद्व्यवहारे स्थितिमाक्षिप्य आत्मानुभवशालिनीं स्थितिमुपदिशति अविनाशिनम् इति।

हे शिष्य! अविनाशिनं निर्विकल्पं त्रैकालिकसत्ताशालिनं कालतो व्यवच्छेदशून्यम् आत्मानं देशतो व्यवच्छेदशून्यम् एकं वस्तुतो व्यवच्छेदशून्यम्, चित्स्वरूपं विज्ञाय निदिध्यास्य तत्त्वतः आत्मज्ञस्य अतएव धीरस्य तव अर्थार्जने व्यवहारिकार्यसंपदि कथं रतिः प्रीतिर्भवति इति आक्षेपः॥ १॥

आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे ।
शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे ॥२॥
विश्वं स्फुरति यत्रेदं तरङ्गा इव सागरे ।
सोऽहमस्मीति विज्ञाय किं दीन इव धावसि ॥३॥

ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशङ्क्य विषयप्रीतेः आत्माज्ञानमूलत्वं सदृष्टान्तं सोपपत्तिकमाह आत्माज्ञानात् इति ।

अहो इति सम्बोधने। हे शिष्य ! विषयभ्रमगोचरे विषये या प्रीतिः सा आत्माज्ञानात् एव भवति न तु ज्ञानात् तद्व्यतिरिक्तविषयाणां बाधादिति भावः ।

अत्र लोकप्रसिद्धं दृष्टान्तमाह शुक्तेः इति । यथा रजतविभ्रमे सति शुक्तेरज्ञानतो लोभः पामराणामपि अनुभवसाक्षिक इत्यर्थः । "विषयभ्रमगोचर" इत्यत्र विशेष्यस्यापि पूर्वं निपातः "विशेषणं विशेष्येण बहुलम्" इत्यत्र बहुलग्रहणादाम्रवृक्षवत् आत्माज्ञानात् इति पदं विषयविभ्रमगोचर इत्यनेनापि सम्बध्यते ॥ २ ॥

अज्ञानमूला विषयप्रीतिरिति प्रागुक्तम्, अथ सर्वाध्यस्ताधिष्ठानतया आत्मनि ज्ञाते सति विषयेषु पुनः न प्रीतिः सम्भवते इत्याह विश्वं स्फुरति इति ।

सागरे तरङ्गा इव यथा पृथक् सत्तारहितास्तद्वत् यत्र इदं विश्वं पृथक्सत्तारहितं स्फुरति सः तत्पदार्थो अहमस्मीति विज्ञाय साक्षात्कृत्य दीन इव ममेदं भवतु इति तृष्णाकुल इव किं धावसि कथं धावसि इति आक्षेपः ॥ ३ ॥

श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुन्दरम् ।
उपस्थेऽत्यन्तसंसक्तो मालिन्यमधिगच्छति ॥४॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
मुनेर्जानत आश्चर्यं ममत्वमनुवर्त्तते ॥५॥
आस्थितः परमाद्वैतं मोक्षार्थेऽपि व्यवस्थितः ।
आश्चर्यं कामवशगो विकलः केलिशिक्षया ॥६॥

तदेवं श्रोत्रियस्यैव ज्ञानिनि शिष्ये दृश्यमाने विषयव्यवहारमाक्षिप्य इदानीं सर्वज्ञानिषु विषयव्यवहारं शिष्यपरीक्षार्थं गुरुराक्षिपति श्रुत्वापि इति ।

शुद्धचैतन्यं श्रुत्वापि गुरुमुखात् वेदान्तवाक्यतः साक्षात्कृत्वापि उपस्थे समीपस्थे विषये अत्यन्तसंसक्तः सन् आत्मज्ञः कथं मालिन्यं मौढ्यम्, अधिगच्छति प्राप्नोति अस्य प्रकरणस्य शिष्यजिज्ञासार्थमाक्षेपमुद्रयैव प्रवृत्तत्वात् यत्र आक्षेपवाचकं पदं न दृश्यते तत्र तत् अध्याहर्त्तव्यम् ॥ ४ ॥

पुनरपि आश्चर्यमुद्रया आक्षिपति सर्वभूतेषु इति ।

सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु आत्मानम् अधिष्ठानभूतं जानतः सर्वभूतानि च आत्मनि रज्जौ भुजङ्गवदध्यस्तानि जानतो मुनेः विषयेषु ममत्वमनुवर्त्तते इति आश्चर्यम् अयु-क्तं न हि शुक्तिकायामध्यस्तं रजतम् इति जानतश्च ममत्वं सम्भवति इति भावः ॥ ५ ॥

आस्थित इति। परमं सजातीयविजातीयस्वगतभेदशून्यम् अद्वैतम् आस्थितः साक्षात् अनुभवन्, तथा मोक्षस्वरूपोऽर्थः सच्चिदानन्दात्मा. तत्र व्यवस्थितः तदेकप्रवणो-

उद्भूतं ज्ञानदुर्मित्रमवधार्यातिदुर्बलः ।
आश्चर्यं काममाकाङ्क्षेत् कालमन्तमनुश्रितः ॥७॥

इहामुत्र विरक्तस्य नित्यानित्यविवेकिनः ।
आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका ॥८॥

धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा ।
आत्मानं केवलं पश्यन् न तुष्यति न कुप्यति ॥९॥

ऽपि कामवशगः सन्, केलिविषया नानाक्रीड़ाभ्यासेन विकलो दृश्यते इति आश्चर्यम् ॥ ६ ॥

उद्भूतम् इति । उद्भूतं कामं ज्ञानदुर्मित्रं ज्ञानस्य अत्यन्तवैरिणम् अवधार्य निश्चित्यापि अतिदुर्बलः अतिशयेन बलशून्य इव ज्ञानी, कामं विषयम्, आकाङ्क्षेत् कामं वाञ्छति, इदम् आश्चर्यम्, कीदृशः अन्तं कालमनु समीपे श्रितः, न हि समीपवर्तिनि अन्तकाले सति विवेकिनो विषय[illegible] युक्तेति भावः ॥ ७ ॥

इहामुत्र विरक्तस्य इति । ऐहिकामुष्मिकभोगविरक्तस्य नित्यम् आत्मतत्त्वम् अनित्यं शरीरादिकम्, तद्विवेकिनः, मोक्षः सच्चिदानन्दस्तत्र कामोऽन्तःकरणं यस्य एवंविधस्य ज्ञानिनोऽपि मोक्षात् एव अनुभूततनुधनवियोगात् एव, विभीषिका भयं दृश्यते इति आश्चर्यम् । न हि स्वप्नदृष्टतनुधननाशेऽपि जाग्रतां भयं क्वापि दृष्टम् इति भावः ॥ ८ ॥

एवमाक्षेपमुद्रया पूर्वमुक्तम् । अथ ज्ञानिनस्तोषरोषौ अनुचितौ इति कथयन् निरूपयति धीर इति ।

धीरो ज्ञानी लोकैर्विषयान् भोज्यमानोऽपि तथा निन्दा-

चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत् ।
संस्तवे चापि निन्दायां कथं क्षुभ्येत् महाशयः ॥१०॥
मायामात्रमिदं विश्वं पश्यन् विगतकौतुकः ।
अपि सन्निहिते मृत्यौ कथं त्रस्यति धीरधीः ॥११॥
निःस्पृहं मानसं यस्य नैराश्येऽपि महात्मनः ।
तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ॥ १२ ॥

दिना पीड्यमानोऽपि सर्वदा आत्मानम् केवलं सुखदुःख-भोगादिरहितं पश्यन् न तुष्यति न क्रुप्यति । तोषरोष-हेतूनां केवलात्मनि अनध्यवसानात् इति भावः ॥ ८ ॥

किञ्च तोषरोषहेतूनां स्तुतिनिन्दादीनां शरीरधर्मत्वात् शरीरस्य च आत्मभिन्नत्वेनानुसन्धानात्, कथं ज्ञानिनस्तोष-रोषौ इत्याह चेष्टमानम् इति । स्वं शरीरम् स्वात्मभिन्न-चेष्टाश्रयत्वात् अन्यशरीरवत् इति यः पश्यति स महाशयः संस्तवे स्तुतौ अपि च निन्दायां कथं क्षुभ्येत् कथं तोषरोष-रूपां विक्रियां व्रजेत् इति आक्षेपः ॥ १० ॥

मार्यमारकयोरनित्यत्वानुसन्धानात् सन्निहितेऽपि मृत्यौ ज्ञानिनः त्रासः कथमित्याह मायामात्रम् इति ।

इदं दृश्यमानम्, विश्वं मार्यमारकादिरूपं समस्तं माया-मात्रम् असद्रूपं पश्यन् अतएव कुत इदं शरीरादिकं जायते, कुत्र विलयं याति एवं रूपकौतुकरहितस्तथा धीरधीः धीरा अचञ्चला धीर्यस्य सः, सन्निहिते मृत्यौ सति अपि कथं त्रस्यति इति आक्षेपः ॥ ११ ॥

सर्वेषामाक्षेपाणां समर्थनार्थं ज्ञानिनो निरुपमत्वमाह

स्वभावादेव जानानो दृश्यमेतन्न किञ्चन ।
इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः ॥१३॥
अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्य निराशिषः ।
यदृच्छयागतो भोगो न दुःखाय न तुष्टये ॥१४॥

अथ शिष्योक्तानुभवोल्लासनामकं चतुर्थं
प्रकरणं प्रारभ्यते।

हन्तात्मज्ञस्य धीरस्य खेलतो भोगलीलया ।
न हि संसारवाहीकैर्मूढैः सह समानता ॥ १ ॥

निःस्पृहम् इति। यस्य नैराश्ये मोक्षे अपि मानसं निःस्पृहम् तस्य आत्मज्ञानतृप्तस्य ब्रह्माहमस्मीति जानतः समासक्तमनोरयस्य केन समं तुलना जायते न केनापि इत्यर्थः ॥ १२ ॥

ज्ञानिनः त्यागोपादानादिव्यवहारमाक्षिपति स्वभावात् एव इति। प्रपञ्चो मिथ्या दृश्यत्वात् शुक्तिकारजतवत् इत्यनुमानात् एतत् दृश्यं न किञ्चन, न सदपि असदिति जानानो निश्चयवान् यो धीरधीः, स इदं ग्राह्यमिदं त्याज्यम् इति कथं पश्यति इति आक्षेपः ॥ १३ ॥

अत्र हेतुमाह अन्तस्त्यक्तकषायस्य इति। अन्तःकरणात् त्यक्ताः कषायाः विषयवासना येन तस्य निर्द्वन्द्वस्य शीतोष्णादिसमचित्तस्य अतएव निराशिषः विषयवासनाविहीनस्य यदृच्छया दैवयोगात् आगतः प्राप्तो भोगः भुज्यमानो विषयो दुःखाय न भवति तुष्टये च न भवति ॥ १४ ॥

आक्षेपद्वारेणोपदेशकं नाम तृतीयं प्रकरणं समाप्तम्।

यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः ।
अहो तत्र स्थितो योगी न हर्षमुपगच्छति ॥ २ ॥

गुरुरेवमुपाक्षिप्तः शिष्यो ज्ञानदृढोऽभवत् ।
ज्ञानिन्यपीतरचेष्टानां साम्यमाचष्ट तद्यथा ॥

एवं तावद्गुरुणा परीक्षार्थमाक्षिप्तः शिष्यः प्रारब्धवशात् बाधितानुवृत्त्या ज्ञानिन्यपि सर्वव्यवहाराणाम् उपपत्तिम् आत्मज्ञानोल्लासवशात् एव आह षड्भिः श्लोकैः हन्त इति ।

हन्त इति आत्मज्ञानोल्लासिते हर्षे, हे गुरो ! आत्मज्ञस्य सर्वाधिष्ठानतया स्वात्मानं जानतः अतएव धीरस्य विषयैः अविक्षिप्तचित्तस्य, भोगलीलया विषयभोगादिरूपया लीलया क्रीडया प्रारब्धवशात् प्रवृत्तया, खेलतः क्रीडतः, संसारवाहीकैः संसारवृत्तिपशुभिः मूढैः देहाद्यात्मवेदिभिः सह न हि समानता नैव तुल्यत्वम् तदुक्तं भगवता "तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः, गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ १ ॥

ननु संसारव्यवहारस्थो ज्ञानी, कथं न संसारितुल्य इत्याशङ्क्य हर्षादिरहितत्वात् तस्य वैलक्षण्यमाह यत्पदम् इति

अहो इति सम्बोधनं । हे गुरो ! यद्वा अहो आश्चर्यं शक्राद्याः सर्वदेवताः अपि, यत्पदं प्रेप्सवः यत्पदं प्राप्तुमिच्छन्तो दीनाः तदप्राप्तितः शोच्याः वर्तन्ते तत्र अधिष्ठानाख्ये पदे स्थितः तत्त्वम्पदार्थैक्यज्ञानात् तत्र वर्तमानो योगी ब्रह्मसाक्षात्कारी विषयभोगात् न हर्षं प्राप्नोति नापि तदपगमात् उद्विग्नो भवति इत्यर्थः ॥ २ ॥

तज्ज्ञस्य पुण्यपापाभ्यां स्पर्शो ह्यन्तर्न जायते ।
न ह्याकाशस्य धूमेन दृश्यमानापि सङ्गतिः ॥३॥
आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना ।
यदृच्छया वर्त्तमानं तं निषेद्धुं क्षमेत कः ॥४॥
आब्रह्मस्तम्बपर्य्यन्ते भूतग्रामे चतुर्विधे ।
विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्जने ॥५॥

तत्त्वज्ञस्य विध्यकिङ्करत्वं वक्तुं पुण्याद्यसंस्पर्शमाह तज्ज्ञस्य इति । तत्त्वम्पदार्थैक्याभिज्ञस्य पुण्यपापाभ्यां सह अन्तःकरणधर्माणां स्पर्शः सम्बन्धो न जायते "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" इति स्मृतेः ।

अत्र दृष्टान्तमाह न हि इति, यथा हि आकाशस्य धूमेन सह दृश्यमानापि सङ्गतिः नास्ति । तथा आत्मज्ञस्य पुण्यादिसङ्गतिरित्यर्थः ॥ ३ ॥

ननु कर्मणि सति कथं न पुण्यादिस्पर्श इत्याशङ्क्य ज्ञानिनो विधिनिषेधानियम्यत्वमाह आत्मैव इति ।

येन महात्मना इदं दृश्यमानं सर्वं जगत्, आत्मैव इति ज्ञातं तं ज्ञानिनं यदृच्छया प्रारब्धवशात् एव वर्त्तमानं को वा विधिकलापो निषेद्धुं प्रवर्त्तयितुं वा क्षमेत समर्थो भवेत् न कोऽपि इत्यर्थः । तदुक्तं शारीरकभाष्ये "अविद्यावद्विषयो वेदः" इति । "प्रबोधनीय एवासौ सुप्तो राजेव बन्दिभिः" इति स्मृतिरपि ॥४॥

ननु ज्ञानिनोऽपि न यदृच्छया प्रवर्त्तन्ते किन्तु इच्छानिच्छयोर्निवर्त्तयितुमशक्यत्वात् इत्याशङ्क्याह आब्रह्मस्तम्बपर्य्यन्त इति । यद्यपि ब्रह्माणमारभ्य स्तम्बपर्य्यन्ते इच्छानिच्छे

आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरम् ।
यद्वेत्ति तत् स कुरुते न भयं तस्य कुत्रचित् ॥६॥

अथ आचार्योक्तं लयचतुष्टयं नाम पञ्चमं प्रकरणम् ।

न ते सङ्गोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि ।
सङ्घातविलयं कुर्वन्नेवमेव लयं व्रज ॥१॥

विवर्जयितुमशक्यो तथापि विद्वानेव इच्छाद्वेषनिवर्त्तने सामर्थ्य-मतो यदृच्छया प्रवर्त्तमानो ज्ञानी न विधिनिषेधनियम्य इत्यर्थः ॥ ५ ॥

अद्वैतज्ञानेन द्वितीयस्य बाधितत्वात् ज्ञानिनां भयहेतुः कोऽपि नास्ति इत्युपसंहरति आत्मानम् इति ।
कश्चित् सहस्रेषु एक एव जगदीश्वरं तत्पदार्थम् आत्मानम् त्वम्पदार्थम् अद्वयम् अभिन्नतया जानाति स यद्वेत्ति प्रारब्ध-वशात् बाधितानुवृत्त्या इदं कर्त्तव्यमिति मन्यते तत् करोति एवं कुर्वतः तस्य कुत्रचित् इह वा अमुत्र वा भयं न अस्ति भयहेतोः अद्वैतज्ञानबाधितत्वात् इति भावः ॥ ६ ॥

इति शिष्यप्रोक्तानुभवोल्लासषट्कं नाम चतुर्थं प्रकरणं समाप्तम् ।

एवमुल्लासषट्केन शिष्येऽपि परीक्षिते ।
गुरुर्हठोपदेशार्थं लययोगमथाब्रवीत् ॥

एवमुल्लासषट्केन शिष्ये परीक्षिते सति पुनर्हठोप-देशार्थमाचार्यो लयमुपदिशति । श्लोकचतुष्टयेन न ते इति ।

उदेति भवतो विश्वं वारिधेरिव बुद्बुदः ।
इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज ॥२॥
प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि ।
रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज ॥३॥
समदुःखसुखः पूर्ण आशानैराश्ययोः समः ।
समजीवितमृत्युः सन्नेवमेव लयं व्रज ॥४॥

हे शिष्य ! शुद्धबुद्धस्वभावस्य तव केनापि देहगेहादिनाहङ्कारममकारास्पदेन न सङ्गोऽस्ति, अतः शुद्धः असङ्गस्त्वम्, किं त्यक्तुं किमुपादातुं च इच्छसि तस्मात् सङ्घातस्य देहस्य विलयं कुर्वन् अहं देहीति निरसनं कुर्वन्। देहादिनिरसनरूपम् एव लयं व्रज ॥ १ ॥

उदेति इति । हे शिष्य ! भवतः सकाशात् विश्वम् उदेति भवदभिन्नमेव, यथा वारिधेः सकाशात् बुद्बुदो वारिधेरभिन्न एव उदेति, इति एवम्प्रकारेण एकं सजातीयादिभेदरहितम् आत्मानं ज्ञात्वा एवमेव एकात्मज्ञानमेव लयं व्रज ॥ २ ॥

ननु प्रत्यक्षतो भिन्नतया हारसर्पादिभेदे प्रतीयमाने कथं हारादिविलय इत्यत आह प्रत्यक्षम् इति ।

प्रत्यक्षमपि व्यक्तं इदं विश्वम् अमले त्वयि नास्ति, एव अवस्तुत्वात् रज्जुभुजङ्गवत् तस्मात् एवमेव लयं व्रज द्वितीयस्य हेयोपादेयस्यैव अभावादित्यर्थः ॥ ३ ॥

समदुःखसुख इति । पूर्णं आत्मानन्दपूर्णस्त्वमत एव दैव-वशादुद्भूतयोः सुखदुःखयोः समः आशानैराश्ययोश्च समः ।

तथा जीविते मृत्यौ वा समः निर्विकारः सुखदुःखादीनाम-नात्मधर्माणां तुच्छत्वानुसन्धानात् त्वं सुखदुःखादिषु समः, ब्रह्मस्वरूपं लयं व्रज इत्यर्थः ४ ॥

इति आचार्य्योक्तं लयचतुष्टयं नाम पञ्चमं
प्रकरणं समाप्तम्।

गुरुणैवं परीक्षार्थमुपदिष्टे लये सति।
पूर्णात्मनो लयादीनां शिष्योऽभावमब्रवीत्॥

तदेवं गुरुणा शिष्यपरीक्षार्थं लययोगे समुपदिष्टे सति लयाद्यभावोपपादकमात्मज्ञानमनुवदन्नेव शिष्यः पूर्णात्मनो लयाद्यसम्भवमाह चतुर्भिः श्लोकैः आकाशवत् इति।

अहम् आत्मा आकाशवत् अनन्तः। ननु अनन्तस्यात्मनो देहादिनिवासः कथमित्यत आह घटवत् इति। प्राकृतं प्रकृतिकार्यं जगत् देहादिकं घटवत् यथा घट आकाशस्य अवच्छेदको निवासस्थानं च तथा आत्मनो देहादिक-देहावच्छेदक एव जीव इव घटादिरित्यर्थः।

अत्र प्रमाणमाह इति इति। इति एवं वेदान्तसिद्धं ज्ञानम् अनुभवरूपमस्य प्रमाणमतो न अन्यथाभावमर्हतीत्यर्थः।

तथा इति तथा सति आत्मनोऽनन्तत्वे सति एतस्य आत्मनः त्यागो ग्रहणं लयः च न सम्भवति। परिच्छिन्नस्यैव घटादेस्त्यागादिदर्शनात् इत्यर्थः॥१॥

महोदधिरिवाहं स प्रपञ्चो वीचिसन्निभः।
इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥ २ ॥
अहं स शुक्तिसङ्काशो रूप्यवद्विश्वकल्पना।
इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥३॥
अहं वा सर्वभूतेषु सर्वभूतान्यथो मयि।
इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥४॥

अथ अनुभवपञ्चकं नाम सप्तमं प्रकरणं प्रारभ्यते।

मय्यनन्तमहाम्भोधौ विश्वपोत इतस्ततः।
भ्रमति स्वान्तवातेन न ममास्त्यसहिष्णुता ॥१॥

घटाकाशदृष्टान्ते देहात्मनोर्भेदशङ्का स्यात् इति अपरितोषात् आह महोदधिः इति।

महोदधिः इति स्पष्टम् ॥ २ ॥

समुद्रवीचिदृष्टान्ते देहात्मनोर्विकारविकारिशङ्का स्यात् इति अपरितोषात् आह अहं सः इति।

स्पष्टम् ॥ ३ ॥

शुक्तिदृष्टान्तेऽपि आत्मनि परिच्छिन्नत्वशङ्का स्यात् तद्व्यावृत्त्यर्थमाह अहम् इति। अहं वा अहमेव सर्वभूतेषु प्रकृतिप्राकृतिकेषु सत्तास्फूर्त्यादिप्रदत्वेनास्मि अथ अतो हेतोः सर्वभूतानि अधिष्ठानभूते मयि वर्त्तन्ते इति ज्ञानं वेदान्तसिद्धम्। तथा सति आत्मनस्त्यागादिकं न सम्भवतीत्यर्थः ॥४॥

इति शिष्यप्रोक्तमुत्तरचतुष्कं नाम षष्ठं
प्रकरणं समाप्तम्।

मय्यनन्तमहाम्भोधौ जगद्वीचिः स्वभावतः ।
उदेतु वास्तमायातु न मे वृद्धिर्न च क्षतिः ॥ २ ॥
मय्यनन्तमहाम्भोधौ विश्वं नाम विकल्पना ।
अतिशान्तो निराकार एतदेवाहमास्थितः ॥ ३ ॥

लययोगाननुष्ठाने व्यवहारं निरङ्कुशम् ।
आशङ्क्य शिष्यः स्वोल्लासादब्रवीद्गुरुमुत्तरम् ॥

ननु लययोगाभावे संसारविक्षेपो निरङ्कुशप्रसरः स्यात् इत्याशङ्क्य तत्र अनिष्टत्वाभावमनुभवपञ्चकेनोत्तरमाह शिष्यः ।

मयि इति । हे गुरो ! मयि आत्मनि अनन्ते महासमुद्रे विश्वाख्यः पोतो नौका स्वान्तवातेन मनःपवनेन इतस्ततो भ्रमति, अत्र मम असहिष्णुता असहनशीलता न अस्ति समुद्रस्येव नौकापरिभ्रमणे इत्यर्थः ॥ १ ॥

जगद्व्यवहारस्यानिष्टत्वाभाव पूर्वमुक्तः । अथ जगदुदयापगमयोरपि नानिष्टमित्याह मयि इति ।

आत्मनि अनन्ते विनाशरहिते महति व्यापके अम्भोधौ समुद्रे जगदाख्या वीचिः स्वभावतः दृश्यत्वादिस्वभावात् उदेतु वा परम् अस्तमायातु मम तदुदये वृद्धिर्न अस्ति व्यापकत्वात् तदपगमे च क्षतिर्न अस्ति अनन्तत्वादित्यर्थः ॥ २ ॥

पूर्वं दृष्टान्तेन स्वात्मनः जगद्विकार इति भ्रमपरिणामित्वं स्यात् तद्वारणायमाह मयि इति ।

मयि अनन्तमहाम्भोधौ नाम प्रसिद्धं विश्वं कल्पना भ्रममात्रमेव न तु तात्त्विकम् । अन्तःकरणात् अहम् अतिशान्तः प्रपञ्चोपप्लवरहितः ।

नात्मा भावेषु नो भावस्तत्रानन्ते निरञ्जने ।
इत्यसक्तोऽस्पृहः शान्त एतदेवाहमास्थितः ॥४॥
अहो चिन्मात्रमेवाहमिन्द्रजालोपमं जगत् ।
अतो मम कथं कुत्र हेयोपादेयकल्पना ॥५॥

अथ गुरुप्रोक्तं बन्धमोक्षव्यवस्थाचतुष्कं नाम अष्टमं प्रकरणं प्रारभ्यते ।

तदा बन्धो यदा चित्तं किञ्चिद्वाञ्छति शोचति ।
किञ्चिन्मुञ्चति गृह्णाति किञ्चिद्धृष्यति कुप्यति ॥१॥

अत्र हेतुमाह निराकार इति। एतत् आत्मज्ञानम् एव, अहमास्थितः आश्रितो, न तु लययोगम्। तस्य पूर्वमेव दूषितत्वात् ॥ ३ ॥

अतिशान्तत्वमेव स्पष्टयति नात्मा इति। आत्मा भावेषु देहादिषु, आधेयतया न अस्ति, व्यापकत्वात्, भावो देहादिः, तत्र आत्मनि, नास्ति, अनन्ते निरञ्जने सति, इति कारणात्, अहम् असक्तः संसर्गरहितः, अतएव अस्पृहः इच्छादिधर्मासंश्लिष्टोऽत एव शान्त इत्यर्थः ॥ ४ ॥

इच्छादिरहितत्वे हेत्वन्तरमपि आह अहो इति। अहो इति आश्चर्यरूपं अलौकिकम् चिन्मात्रं चैतन्यमात्रम्, एवाहम्, जगत् सर्वं प्रपञ्चजातम्। इन्द्रजालोपमं दर्शनकालेऽपि पृथक् सत्तारहितम्, अत्र विषयस्य पृथक् सत्तारहितत्वात्, मम कुत्र वस्तुनि, कथं केन प्रकारेण, हेयोपादेयबुद्धिः स्यात् न कुत्रापि इत्यर्थः ॥ ५ ॥

इति सप्तमं प्रकरणं समाप्तम् ।

तदा बन्धो यदा चित्तं किञ्चिद्वाञ्छति शोचति ।
किञ्चिन्मुञ्चति गृह्णाति किञ्चिद्धृष्यति कुप्यति ॥१॥
तदा मुक्तिर्यदा चित्तं न वाञ्छति न शोचति ॥
न मुञ्चति न गृह्णाति न हृष्यति न कुप्यति ॥ २ ॥
तदा बन्धो यदा चित्तं सक्तं कास्वपि दृष्टिषु ।
तदा मोक्षो यदा चित्तमसक्तं सर्वदृष्टिषु ॥ ३ ॥
यदा नाहं तदा मोक्षो यदाहं बन्धनं तदा ।
मत्वेति हेलया किञ्चित् मा गृहाण विमुञ्च मा ॥४॥

इत्थं परीक्षितज्ञानं शिष्यमेवाभिनन्दितुम् ।
गुरुर्बन्धस्य मोक्षस्य व्यवस्थां सम्यगब्रवीत् ॥

तदेवं षड्भिः प्रकरणैः, शिष्यं सम्यक् परीक्ष्य, बन्धमोक्षव्यवस्थानिरूपणव्याजेन गुरुः, शिष्यानुभवमभिनन्दति, चतुर्भिः श्लोकैः तदा इति ।

हे शिष्य ! "अतो मम बन्धं कुत्र हेयोपादेयकल्पना" इत्यन्तं यदुक्तं तत् तथैव, यतः चित्तं यदा विषयवाञ्छादिविकारवत् भवति, तदा एव जीवस्य बन्ध इत्यर्थः ॥१॥

तदा मुक्तिः इति ।

यदा चित्तं वाञ्छादिविकारातीतं तदा मुक्तिः इत्यर्थः ॥२॥

तदेवं पृथक् बन्धमोक्षौ उक्तौ । अथ समुच्चयेन बन्धमोक्षौ आह तदा बन्ध इति ।

यदा चित्तं कास्वपि ममात्मदृष्टिषु संसक्तं तदा बन्धः यदा चित्तं सर्वासु अपि विषयदृष्टिषु संसक्तं न भवति तदा मोक्ष इत्यर्थः ॥ ३ ॥

अथ निर्वेदाष्टकं नाम नवमं

कृताकृते च द्वन्द्वानि कदा शान्तानि कस्य वा ।
एवं ज्ञात्वेह निर्वेदाद्भव त्यागपरोऽव्रती ॥ १ ॥
कस्यापि तात ! धन्यस्य लोकचेष्टावलोकनात् ।
जीवितेच्छा बुभुक्षा च बुभुत्सोपशमं गताः ॥ २ ॥

अस्तु वा बाधितानुवृत्त्या दग्धपटोपमाना सर्वापि विषयदृष्टिर्बन्धहेतुस्तन्निवृत्तौ मोक्ष इति पूर्वमुक्तम्। तथापि अहङ्कारनिवृत्तौ मोक्षस्तदनिवृत्तौ बन्ध इति वदन्नेव शिष्योक्तमर्थमभिनन्दितुमनुवदति यदा नाहम् इति। यदाहम् इत्येवंरूपोऽहङ्काराध्यासोऽनर्थमूलभूतो निवर्त्तते तदा मोक्षः, यदा च सोऽनुवर्त्तते तदा बन्धनम् इति ज्ञात्वा, हेलया अनायासेन एव हानोपादानादिक्रियाणामकर्त्ता त्वमसि, अकर्त्रात्मज्ञानेन कर्तृत्वाभिमानो निवर्त्तत इति भावः ॥ ४ ॥

इति गुरुप्रोक्तं बन्धमोक्षचतुष्कं नाम अष्टमं प्रकरणं समाप्तम्।

शिष्योक्तानुभवस्यैव दार्ढ्यार्थं गुरुणोच्यते।
निर्वेदः अष्टमष्टाभिरिच्छादित्यजनात्मकः ॥ १ ॥

"मत्वेति हेलया किञ्चिन्मा गृहाण" इति यदुक्तम्, तत्र किं द्वारमित्यपेक्षायाम्, गुरुः अनुमोदनमुद्रया वैराग्याष्टकमाह कृता कृते इति। कृताकृते इदं कर्त्तव्यमिदमकर्त्तव्यमिति अभिनिवेशो, द्वन्द्वानि सुखदुःखादीनि, कस्य, कदा वा शान्तानि निवृत्तानि, अपि तु न कस्यापि कदापि शान्तानि इत्यर्थः, एवं ज्ञात्वा, इह कृताकृतादिषु, निर्वेदात् अभिनिवेशादिपरित्यागादेव त्यागपरो भव। कीदृशस्त्वम् अव्रती नास्ति व्रतं कुत्रापि आग्रहो यस्य सः ॥ १ ॥

अनित्यं सर्वमेवेदं तापत्रितयदूषितम् ।
असारं निन्दितं हेयमिति निश्चित्य शाम्यति ॥३॥
कोऽसौ कालो वयः किं वा यत्र द्वन्द्वानि नो नृणाम् ।
तान्युपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात् ॥ ४॥

चित्तधर्मत्यागरूपो निर्वेदस्तु कस्यचित् एव स्यात् न तु सर्वस्य इत्याह कस्यापि इति । हे तात शिष्य ! महत्सु मध्ये कस्यचित् एव धन्यस्य उत्पत्तिविनाशरूपलोकचेष्टावलोकनात् जीवितेच्छा-भोगेच्छा-ज्ञानेच्छादयः उपशमं गताः । इदं तु तादृशं निर्वेदमप्यवधिभूतमभिनन्दितुमेव उच्यते, न तु उपदिश्यते इति प्रागुक्तमेव ॥ २ ॥

ननु प्राणिनां सर्वत्र इच्छोपशमः किं हेतुक इति अत आह अनित्यम् इति । इदं दृश्यमानं सर्वप्रपञ्चजातम् अनित्यं चैतन्येऽध्यस्तम् तथा पृथक् सत्त्वेन दृश्यमानं सत् आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयदूषितम्, अतएव असारं तुच्छम् असत् एव हेयं पृथक्सत्तया नैव आदरणीयम् इति निश्चित्य ज्ञानी शाम्यति कुत्रापि इच्छां न कुरुते ॥ ३ ॥

द्वन्द्वानामारब्धकर्मकत्वात् अवश्यम्भावित्वात् तत्र इच्छानिच्छे विहाय यथा प्राप्तभोगी सुखम् अवाप्नुयात् इत्याह कोऽसौ इति । यत्र नृणां द्वन्द्वानि सुखदुःखादीनि न सन्ति, असौ कः कालः, का वा बाल्यादिवयोऽवस्था शरीरावस्था, अपि तु न कापीति विचार्य तानि द्वन्द्वानि उपेक्ष्य तत्र इच्छामकृत्वा यथाप्राप्तेष्टानिष्टवर्ती सिद्धिं सुखम् अवाप्नुयात् इत्यर्थः ॥ ४ ॥

नाना मतं महर्षीणां साधूनां योगिनां तथा।
दृष्ट्वा निर्वेदमापन्नः को न शाम्यति मानवः ॥५॥
कृत्वा मूर्तिपरिज्ञानं चैतन्यस्य न किं गुरुः।
निर्वेदसमतायुक्त्या यस्तारयति संसृतेः ॥ ६ ॥
पश्य भूतविकारांस्त्वं भूतमात्रात् यथार्थतः।
तत्क्षणात् बन्धनिर्मुक्तः स्वरूपस्थो भविष्यसि ॥७॥

तर्कशास्त्रादिशास्त्रेषु निष्ठा न कर्तव्या नानाविधविप्रतिपत्तिग्रस्तत्वात् नापि कर्मसु नापि अष्टाङ्गयोगादिषु इत्याह नानामतम् इति। महर्षीणां गौतमजैमिनिप्रभृतीनां मतं नानाविधं परिच्छिन्नं दृष्ट्वा तर्कशास्त्रादिभ्यो निर्वेदमापन्नः, तथा साधूनां कर्मनिष्ठानां मतं नानाविधं केचित् होमपराः केचित् जपपराः केचित् कृच्छ्रचान्द्रायणादिपराः इति नानाविधं मतं दृष्ट्वा कर्मभ्योऽपि निर्वेदमापन्नः केवलमात्मानुसन्धाननिष्ठः को न शाम्यति सः सुखं न प्राप्नोति इत्यर्थः ॥ ५ ॥

केवलं ज्ञाननिष्ठामेवाश्रित्य कर्मादिकं मा कुर्वित्याह कृत्वा इति। निर्वेदसमतायुक्त्या निर्वेदो नाम विषयाणामसक्तिस्तया शत्रुमित्रेषु समता सर्वत्र आत्मबुद्धिर्युक्तिर्नाम श्रुत्यनुग्राहकतर्कः, एतैः चैतन्यस्य सच्चिदानन्दस्य मूर्तिपरिज्ञानं स्वरूपसाक्षात्कारं कृत्वा तदनन्तरं नास्ति कश्चित्पुंस्यर्थस्य स न किं गुरुः एवंविधो यः सः संसृतेः संसारात् आत्मानं तारयति ॥ ६ ॥

चैतन्यस्य स्वरूपज्ञानोपायमाह पश्य इति। हे शिष्य! भूतविकारान् देहेन्द्रियादीन् यथार्थतः तत्त्वतः भूतमात्रान्

वासना एव संसार इति सर्वा विमुञ्च ताः।
तत्त्यागो वासनात्यागात् स्थितिरद्य यथा तथा॥८॥

अथ गुरुप्रोक्तमुपशमाष्टकं नाम दशमं प्रकरणं प्रारभ्यते।

विहाय वैरिणं काममर्थं चानर्थसङ्कुलम्।
धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु॥१॥

पश्य न तु आत्मस्वरूपात् एवं सति त्वं तत् क्षणात् बन्धनिर्मुक्तः शरीराद्यध्यासनिर्मुक्तः सन् शरीरादिविविक्तात्मस्वरूपस्थो भविष्यसि शरीरादावनात्मतया ज्ञाते सति तत्साक्षिभूत आत्मा झटिति स्फुरेदिति भावः॥७॥

ननु एवमात्मनि ज्ञातेऽपि तत्र निष्ठा कथं स्यात् इत्याशङ्क्य वासनात्यागात् इत्याह वासना इति। वासना विषयवासना एव संसार इति कारणात् ता वासनाः सर्वा विमुञ्च वासनात्यागात् च आत्मनिष्ठायां सत्यां तस्य संसारस्य त्याग इत्यर्थः। अद्य अधुना वासनात्यागे सति स्थितिर्यथा तथा प्रारब्धं तथैव इत्यर्थः॥८॥

इति गुरुप्रोक्तं निर्वेदाष्टकं नाम नवमं प्रकरणं समाप्तम्।

विषयाणामभावेऽपि तुष्टिर्निर्वेद ईरितः।
तस्मिन् दृष्टे च विषये वैतृष्ण्यं शान्तिरीर्यते॥

विषयैर्विनापि सन्तोषरूपो निर्वेदः प्रागुक्तः। अथ इदानीं विषयदृष्टावुपशममभिनन्दनमुदया गुरुरुदाहरति विहायेति। कामं वैरिणं शत्रुम् विहाय तथा अनर्थसङ्कुलम् अर्जने रक्षणे व्यये वा अनेकशोकदुःखसङ्कुलम् अर्थं विहाय तथा

स्वप्नेन्द्रजालवत् पश्य दिनानि त्रीणि पञ्च वा ।
मित्रक्षेत्रधनागारदारदायादिसम्पदः ॥ २ ॥
यत्र यत्र भवेत् तृष्णा संसारं विद्धि तत्र वै ।
प्रौढ़वैराग्यमाश्रित्य वीततृष्णः सुखी भव ॥ ३ ॥
तृष्णामात्रात्मको बन्धस्तन्नाशो मोक्ष उच्यते ।
भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ॥ ४ ॥

एतयोः अनयोः कामार्थयोः हेतुं धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अनादरम् उपेक्षां कुरु ॥ १ ॥

ननु मित्रक्षेत्रादिफलकेषु कर्मसु कथमनादर इत्याशङ्क्य मित्रादीनामनित्यत्वमाह स्वप्न इति । हे शिष्य ! मित्रादिसम्पदः स्वप्नेन्द्रजालवत् पश्य यतो दिनानि त्रीणि पञ्च वा स्थायिन्य इत्यर्थः ॥ २ ॥

सर्वत्र अनादरं कुरु इति अनेनोक्तं वैतृष्ण्यं पुरुषार्थहेतुरित्याह यत्र यत्र इति । यत्र यत्र येषु येषु विषयेषु तृष्णा भवेत् । तत्र तत्र तमेव संसारं विद्धि विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वात् । अतः प्रौढ़वैराग्यं प्राप्तेऽपि अर्थे प्रीत्यभावमाश्रित्य वीततृष्णः अप्राप्तार्थेच्छारहितः सन् न आत्मनिष्ठया सुखी भव इत्यर्थः ॥ ३ ॥

अमुमेवार्थं भङ्ग्यन्तरेणाह तृष्णामात्रात्मक इति । तृष्णामात्रस्वरूप एव बन्धः, कर्मवासनाद्वारा बन्धहेतुत्वात् तन्नाशः तृष्णानाश एव मोक्षो निवृत्तिहेतुत्वात् ।

"तन्नाशो मोक्ष" इति अत्र हेतुमाह भव इति । भवतीति भवो देहादिविषयस्तत्र देहादिविषये आसक्त्यभावमात्रेण मुहु-

त्वमेकश्चेतनः शुद्धो जडं विश्वमसत्तथा ।
अविद्यापि न किञ्चित्सा का बुभुत्सा तथापि ते ॥५॥
राज्यं सुताः कलत्राणि शरीराणि सुखानि च ।
संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि ॥ ६ ॥
अलमर्थेन कामेन सुकृतेनापि कर्मणा ।
एभ्यः संसारकान्तारे न विश्रान्तमभूत् मनः ॥ ७ ॥

मुहुः वारंवारं प्राप्तितुष्टिः आत्मप्राप्तिजः सन्तोषः स्यात् अतः तृष्णापगमे मोक्षः इत्यर्थः। प्राप्तिस्तुष्टिरिति पाठे प्राप्तिः स्यात् तृप्तिश्च स्यादित्यर्थः ॥ ४ ॥

ननु बुभुत्सारूपा तृष्णा कथं त्याज्येत्याशङ्क्याह त्वमेक इति। इह जगति त्रय एव पदार्थाः आत्मा जगत् अविद्या च, तत्र आत्मा तावत् त्वम् एव एकश्चेतनः शुद्धो न तु भिन्न इति त्वमात्मानमेव एकं पूर्णं जानीहि, न अन्या पुनरात्मबुभुत्सा युक्ता नापि जगद्बुभुत्सा, जगतः असत्त्वात् जडत्वाच्च, नापि अविद्याबुभुत्सा युक्ता, तस्या अपि सदसद्विलक्षणरूपतया अनिर्वचनीयत्वात् तथा च, तव बुभुत्सापि का युक्ता, न कापीत्यर्थः ॥ ५ ॥

जडं विश्वमसत् इत्युक्तं तद्विशदयति राज्यम् इति। राज्यादीनि सर्वाणि, संसक्तस्यापि आसक्तिं कुर्वाणस्यापि तव, जन्मनि जन्मनि नानाजन्मसु, नष्टानि इत्यतो विश्वमसदित्यर्थः ॥ ६ ॥

बुभुत्सापि न कर्त्तव्या इति प्रागुक्तमथ धर्मार्थकामेषु अपि इच्छा न कार्या इत्याह अलम् इति। अर्थादिना अलम् अर्थं-

कृतं न कति जन्मानि कायेन मनसा गिरा ।
दुःखमायासदं कर्म तदद्याप्युपरम्यताम् ॥८॥

अथ ज्ञानाष्टकं नाम एकादशं प्रकरणं प्रारभ्यते ।

भावाभावविकारश्च स्वभावादिति निश्चयी ।
निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति ॥ १ ॥

धर्मकामेषु इच्छा न कार्या इत्यर्थः, अत्र हेतुमाह एभ्य इति । यतः कारणात्, संसारकान्तारे संसारलक्षणे दुर्गमे वर्त्मनि भ्राम्यतस्तव, एभ्यः धर्मकामार्थेभ्यः, विश्रान्तिश्च श्रमविच्छेदो नाभूद्, अतो अर्थादिषु न तृष्णा कर्त्तव्या इत्यर्थः ॥ ७ ॥

तृष्णाया उपशमः प्रागुक्तः, अथ क्रियामात्रोपशममाह कृतम् इति । हे शिष्य । आयासदं प्रयासदम् अतएव दुःखदं कर्म, कायादिना कति जन्मानि न कृतम् अपि तु यावदद्य प्राचीनसर्वजन्मसु अपि कृतकर्मणा तु त्वयागतं एव श्रमः, तत् तस्मात् अद्यापि अधुनापि कर्मभ्य उपरम्यताम् ॥८॥

इति गुरुप्रोक्तमुपशमाष्टकं नाम दशमं प्रकरणं समाप्तम् ।

उक्ता शान्तिर्न विज्ञानं विना कस्यापि जायते ।
इति निश्चितुमेवाह गुरुर्ज्ञानाश्रिताष्टकम् ॥

उक्ता शान्तिर्विज्ञानादेव स्यात् न तु अन्यथेति बोधयितुं ज्ञानाष्टकमाह, तत्रादौ ज्ञानसाधनान्याह भाव इति । भावाभावरूपो विकारः स्वभावात् मायातत्संस्कारादेव जायते, न तु निर्विकारादात्मन इति निश्चयवान् पुरुषो निश्चयबलादेव सुखेन अनायासेन, एव उपशाम्यति ॥ १ ॥

ईश्वरः सर्वनिर्माता नेहान्य इति निश्चयी ।
अन्तर्गलितसर्वाशः शान्तः क्वापि न सज्जते ॥ २ ॥
आपदः सम्पदः काले दैवादेवेति निश्चयी ।
तृप्तः स्वस्थेन्द्रियो नित्यं न वाञ्छति न शोचति ॥ ३ ॥
सुखदुःखे जन्ममृत्यू दैवादेवेति निश्चयी ।
साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते ॥ ४ ॥

ननु मायाया जड़त्वात्तत एव सर्वं भावाभावविकार इत्याशङ्क्याह ईश्वर इति । ईश्वरः एव सर्वनिर्माता न त्वन्यो जीवः ईश्वरपरवशत्वात्, इति निश्चयी पुरुषो निश्चयवशादेव अन्तर्गलितसर्वाशः गतसर्ववाञ्छः, अतएव शान्तो निश्चलचित्तः सन्, क्वापि न सज्जते ॥ २ ॥

ननु ईश्वर एव चेत् सर्वनिर्माता, तर्हि कांश्चिद्दरिद्रान्, कांश्चित्तु धनिनस्तथा कांश्चित् सुखिनः कांश्चिद् दुःखिनो रचयतस्तस्य वैषम्यनैर्घृण्ये स्यातामित्याशङ्क्याह आपद इति । काले समयविशेषे, आपदः सम्पदश्च दैवात् प्राक्तनादृष्टादेव ईश्वरप्रतिपादितात् एव इति निश्चयी अतएव तृप्तो वीतस्पृहः अतएव नित्यं स्वस्थेन्द्रियो विषयाणामाकृष्टेन्द्रिय अप्राप्तं न वाञ्छति, नष्टं न शोचति इत्यर्थः ॥ ३ ॥

ननु तत्त्वनिश्चयवानपि कर्माणि कुर्वन्नेव दृश्यत इत्याशङ्क्याह सुख इति । कर्मफलभूते सुखादिके दैवात् अदृष्टात् एव इति निश्चयी अतएव इदं मया इदं कर्म साध्यमिति अदर्शी, अतएव निरायासः श्रमरहितः प्रारब्धवशात् कुर्वन्नपि

चिन्तया जायते दुःखं नान्यथेहेति निश्चयी ।
तया हीनः सुखी शान्तः सर्वत्र गलितस्पृहः ॥ ५ ॥
नाहं देहो न मे देहो बोधोऽहमिति निश्चयी ।
कैवल्यमिव सम्प्राप्तो न स्मरत्यकृतं कृतम् ॥ ६ ॥
आब्रह्मस्तम्बपर्य्यन्तमहमेवेति निश्चयी ।
निर्विकल्पः शुचिः शान्तः प्राप्ताप्राप्तविनिर्वृतः ॥७॥

न लिप्यते कर्मजानर्थभागी न भवति कर्तृत्वाध्यासरहितत्वात् इत्यर्थः ॥ ४ ॥

ननु कुर्वन् कथं निरायास इत्याशङ्क्याह चिन्तया इति । इह दुःखं चिन्तया जायते न अन्यथा इति निश्चयी अतएव च तया चिन्तया हीनः, अतएव शान्तः स्थिरान्तःकरणः, अतएव सर्वत्र सुखतत्साधनयोः गलितस्पृहः पुरुषः सुखी भवति इत्यर्थः ॥ ५ ॥

उक्तसाधनैः सिद्धज्ञानिनां निजदशां निरूपयति नाहम् इति । अहं देहो न तथा मे देहो न किन्तु नित्यबोधोऽहमिति ज्ञानवशात् देहादौ निवृत्ताहम्ममाभिमानः देहादीनां कृतम् अकृतं च मया कृतमिति न स्मरति । यथा कैवल्यं विदेहकैवल्यं प्राप्य कृताकृतं न स्मरति तद्वदित्यर्थः ॥ ६ ॥

आब्रह्म इति । ब्रह्माद्यं हिरण्यगर्भमारभ्य तृणस्तम्बपर्य्यन्तं सर्वं जगत् अहमेवेति प्रत्ययनिश्चयवान् पुरुषः निर्विकल्पः सङ्कल्पविकल्पशून्यः अतएव शुचिः विषयासङ्गरूपमलरहितः, अतएव शान्तो निश्चलान्तःकरणः, अतएव प्राप्ताप्राप्तयोरपि विषययोर्निर्वृतः परमसन्तोषवान् आत्मानन्दपूर्णत्वात् इत्यर्थः॥७॥

नाश्चर्यमिदं विश्वं न किञ्चिदिति निश्चयी।
निर्वासनः स्फूर्तिमात्रो न किञ्चिदिव शाम्यति ॥८॥

अथ एवमेवाष्टकं नाम द्वादशप्रकरणम्।

कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः।
अथ चिन्तासहस्तस्मादेवमेवाहमास्थितः ॥ १ ॥

ननु आत्मज्ञानी कथं निर्विकल्पादिरूप इत्याशङ्क्याह नाना इति। अधिष्ठानतत्त्वसाक्षात्कारेणाध्यस्तबाधे सति नानाश्चर्यम् इदं विश्वं जगत् न किञ्चित् पृथक् सत्ताशून्यम् इति निश्चयी पुरुषः निरस्तवासनः केवलचिद्रूपः सन् न किञ्चित् इव विषयव्यवहारागोचर एव शाम्यति निरस्तकार्यकारणोपाधिर्भवति। तत्त्वज्ञानेन सर्वस्यापि अपुनर्विहृतमित्यर्थः ॥ ८ ॥

इति ज्ञानाष्टकं नाम एकादशं प्रकरणं समाप्तम्।

अथ एवमेवाष्टकं नाम द्वादशं प्रकरणं प्रारभ्यते।

गुरुणोदीरितं ज्ञानं न किञ्चिदिव शाम्यति।
तत्फलमभिव्याप्तुं शिष्यो वदति साम्प्रतम् ॥

उक्तं ज्ञानाष्टकेन "न किञ्चिदिव शाम्यति" इति। तदेव शिष्यः, स्वस्मिन् विशदयितुमेवमेवाष्टकमाह। तत्र प्रथमं कायवाङ्मनसां व्यापारोपरममाह काय इति। अहं पूर्वम् अपि कायिकरूपकर्मासहः, ततो हेतोः वाग्विस्तरासहः जपकर्मासहः, अथ यतो मनोव्यापाररूपा या चिन्ता तत्र असहस्तस्मात् हेतोः, एवमेव निर्व्यापार एव अहमास्थितः आत्मनि एव, स्थित इत्यर्थः ॥ १ ॥

प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः ।
विक्षेपैकाग्रहृदय एवमेवाहमास्थितः ॥ २ ॥
समाध्यासादिविक्षिप्तौ व्यवहारः समाधये ।
एवं विलोक्य नियममेवमेवाहमास्थितः ॥ ३ ॥
हेयोपादेयविरहादेवं हर्षविषादयोः ।
अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः ॥ ४ ॥

उक्तव्यापारत्रयोपरमहेतुं वदन्नेव उक्तमनुवदति प्रीत्यभावेन इति। अयित्तु फलजनकस्य शब्दादेः शब्दकायकर्मद्वयस्य, प्रीत्यभावेन प्रीत्यविषयत्वेन, आत्मनश्च अदृश्यत्वेन, त्रिविधविक्षेपेभ्यो व्यावृत्तं एकाग्रं हृदयं यस्य स विक्षेपैकाग्रहृदय इति मध्यमपदलोपी समासः। अयित्तु फलजनकस्य जपादेः प्रीत्यविषयत्वाज्जपादिरूपो विक्षेपो न समस्ति, आत्मनश्चादृश्यत्वात् ध्यानाख्यविषयत्वाच्चिन्तारूपोऽपि विक्षेपो मम नास्तीत्यर्थः। अतएवमेव स्वस्वरूपेण एव, अहमास्थितः ॥ २ ॥

ननु तथापि समाध्यर्थं व्यवहारः कर्तव्य इत्याशङ्क्याह, न इत्याह समाध्यासादि इति।

कर्तृत्वभोक्तृत्वात् अनर्थाध्यासादिभिः विक्षिप्तौ सत्यां तन्निरासार्थम् समाधये व्यवहारो भाव्य इति नियमं विलोक्य यद्यप्यज्ञानिनि मदध्यासाभावादेव समाधिशून्य एवाहमास्थित इत्यर्थः ॥ ३ ॥

हेय इति। पूर्णात्मदर्शिनो मम हेयोपादेयवस्तुनो विरहात्, अतएवम् अमुना प्रकारेण। हर्षविषादयोः अपि अभा-

आश्रमानाश्रमं ध्यानं चित्तस्वीकृतवर्जनम्।
विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः॥ ५॥
कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा।
बुध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः॥ ६॥
अचिन्त्यं चिन्त्यमानोऽपि चिन्तारूपं भजत्यसौ।
त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः॥ ७॥
एवमेव कृतं येन स कृतार्थो भवेदसौ।
एवमेव स्वभावो यः स कृतार्थो भवेदसौ॥ ८॥

वात्, हे भगवन् गुरो! अहं अधुना, अहमेवमेवास्थित इत्यर्थः॥ ४॥

आश्रम इति। आश्रमानाश्रमम् ध्यानं च तथा तत्-प्रयुक्तं चित्तस्वीकृतवर्जनं च एतैस्त्रिभिरेव मम विकल्पं सङ्कल्पविकल्पं वीक्ष्य अहमेवमेव एतत्त्रयरहित एव, आस्थितः॥ ५॥

कर्म इति। यथैव कर्मानुष्ठानमज्ञानात्, तथैवोपरमः कर्मोपरमोऽपि अज्ञानादेव, इदम्, सम्यक् यथार्थतो, बुध्वा एवं कर्मतदुपरमरहित एव अहमास्थितः॥ ६॥

अचिन्त्यम् इति। अचिन्त्यं ब्रह्मेति चिन्त्यमानोऽपि असौ आत्मचिन्तात्मकं रूपं भजति, तस्मात् हेतोः तद्भावनम्, अचिन्त्यं ब्रह्मेति भावनं त्यक्त्वा अहमेवमेव भावनारहित एव आस्थितः॥ ७॥

एव मेव इति अवस्थायाः बाधकोऽपि नेहः, किं पुनस्तत्-

अथ यथासुखसप्तकं नाम त्रयोदशप्रकरणम्।

अकिंचनभवं स्वास्थ्यं कौपीनत्वेऽपि दुर्लभम्।
त्यागादाने विहायास्मादहमासे यथासुखम्॥ १॥
कुत्रापि खेदः कायस्य जिह्वा कुत्रापि खिद्यते।
मनः कुत्रापि तत्त्यक्त्वा पुरुषार्थे स्थितः सुखम्॥२॥

स्वभाव इति कैमुतिकन्यायेन आह एवमेव इति। येन एवमेव सर्वक्रियारहितमेव स्वरूपम् साधनवशात् ज्ञातम् सोऽसौ कृतार्थो भवेत्। यः तु एवमेव स्वभाववान् सोऽसौ कृतार्थो भवतीति किं वक्तव्यमित्यर्थः॥ ८॥

एव मेवमेवाष्टकं नाम द्वादशं प्रकरणं समाप्तम्।

एवमेवेत्यवस्थायाः फलीभूतां सुखस्थितिम्।
आह शिष्यः स्फुटीकर्तुमहमासे यथासुखम्॥

अथ "एवमेव" इति अवस्थायाः फलीभूतां सुखावस्थां स्वकीयां विमर्दयितुमाह अकिंचन इति। अकिंचनभवं सर्व-सङ्गाभावजन्यम् स्वास्थ्यं चित्तस्थैर्यम्, कौपीनत्वेऽपि कौपीनमात्रत्वेऽपि दुर्लभम् अस्मात् कारणात् अहं त्यागादाने विहाय त्यागग्रहणयोरासक्तिं विहाय यथासुखं सुख-मनतिक्रम्य अहमासे। न कदाचित् दुःखीत्यर्थः॥ १॥

कुत्रापि इति। कुत्रापि शरीरकर्मणि। कायस्य खेदः कुत्रापि वाग्व्यवहारकर्मणि, जिह्वा खिद्यते, कुत्रापि ध्यानादि-कर्मणि, मनः खिद्यते, अतोऽहं तत्त्रयम् अपि त्यक्त्वा सुखं यथा तथैव, पुरुषार्थे आत्मन्येव, स्थितः॥ २॥

कृतं किमपि नैव स्यादिति सञ्चिन्त्य तत्त्वतः ।
यदा यत्कर्तुमायाति तत्कृत्वासे यथासुखम् ॥२॥
कर्मनैष्कर्म्यनिर्बन्धभावा देहस्थयोगिनः ।
संयोगायोगविरहादहमासे यथासुखम् ॥ ३ ॥
अर्थानर्थौ न मे स्थित्या गत्या न शयनेन वा ।
तिष्ठन् गच्छन् स्वपन् तस्मादहमासे यथासुखम् ॥४॥
स्वपतो नास्ति मे हानिः सिद्धिर्यत्नवतो न वा ।
नाशोल्लासौ विहायास्मादहमासे यथासुखम् ॥५॥

ननु कायवाङ्मनोव्यापाराभावे दुःख एव स्यात् परलोकफलाद्युपाधानादेरपि स्नानादित्यागोऽयुक्त इत्यत आह कृतमिति । शरीरेन्द्रियादिभिः कृतं किमपि तत्त्वतः परमार्थतः न स्यादिति संचिन्त्य, यदा यत् शरीरादिधर्मं, कर्तुमायाति, तत् प्रारब्धानुसारेण कृत्वा, अहं यथासुखम् आसे ॥ २ ॥

ननु कर्म वा नैष्कर्म्यं वा एकतरं निर्बन्धः योगिनां, पुरुषार्थसिद्धिहेतुत्वादेव कर्म इति । कर्मनैष्कर्म्यनिर्बन्धरूपा भावाः । देहस्थयोगिनः देहाभिमानयोगिन एव । अहं तु देहसंयोगासंयोगविरहादपि यथासुखम् आसे, तथा च मम देहाद्यभिमानाभावात् कर्मनैष्कर्म्यनिर्बन्ध इत्यर्थः ॥ ३ ॥

ननु लौकिकव्यापारेऽपि तव निर्बन्धः स्यात् अत आह अर्थानर्थाविति । मम स्थित्यादिना जातौ अर्थानर्थौ न स्तः, पूर्वोक्तहेतुत्वात्, तस्मात् यथायथा, तिष्ठन् गच्छन् स्वपन् वा, अहम् यथासुखमासे ॥ ४ ॥

सुखादिरूपानियमं भावेष्वालोक्य भूरिशः।
शुभाशुभे विहायास्मादहमासे यथासुखम् ॥ ७ ॥

॥ अथ शान्तिचतुष्टयं नाम चतुर्दशप्रकरणम्।

प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः।
निद्रितो बोधित इव क्षीणसंस्मरणो हि सः ॥१॥

एतदेव भङ्ग्यन्तरेणाह स्वपत इति। स्वपतो यत्नरहितस्य मे मम, हानिः नास्ति, यत्नवतः च वा मम, सिद्धिः फलविशेषप्राप्तिः नास्ति, यस्मात् कारणात् यत्नायत्नयोः नाशोल्लासौ विहायाहं यथासुखमासे ॥ ६ ॥

सुखादि इति। भावेषु पदार्थेषु, सुखादिरूपानियमं सुखदुःखादिधर्माणामनित्यत्वम्। भूरिशः बहुशः, आलोक्य, तस्मात् सुखाद्यनित्यत्वदर्शनाद्धेतोः, अहं यथासुखमासे ॥ ७ ॥

इति यथासुखसप्तकं नाम त्रयोदशप्रकरणं समाप्तम्।

उदीरितां सुखावस्थां समर्थयितुमात्मनि।
प्राह शिष्यः स्वमावस्थां चतुःश्लोक्या गुरुं प्रति ॥

पूर्वं तु गुरुणा उपशमादिकमुक्तम्, सम्प्रति तु शिष्यः स्वसुखावस्थासमर्थनार्थमात्मनः स्वमावस्थामाह प्रकृत्या इति। प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः, प्रमादात् पशुविपूर्वकमारब्धकर्मद्वारात् विषयान् भावयति चिन्तयतीति भावभावनः, स इव निद्रितो बोधित इव, स यथा निद्रावशात् शून्यचित्तः

क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः ।
क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा ॥ २ ॥
विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे ।
नैराश्ये बन्धमोक्षे च न चिन्ता मुक्तये मम ॥ ३ ॥
अन्तर्विकल्पशून्यस्य बहिः स्वच्छन्दचारिणः ।
भ्रान्तस्येव दशास्तास्तास्तादृशा एव जानते ॥ ४ ॥

न्निचित् बोधितत्वात् प्रमादाद्भावभावनः एवंविधो यः पुमान् विषयेषु शान्तचित्तः, सः हि निश्चितं क्षीणसंस्मरणः संसारहेतुविषयानुस्मरणाभावादित्यर्थः ॥ १ ॥

क्व धनानि इति। विषयभावनाशून्यस्य पूर्वोक्तदर्शिनो मे, यदा स्पृहा विषयेच्छा गलिता, तदा मे मम, क्व धनानि, क्व विषयरूपा दस्यवः चोराः, क्व, शास्त्रं च, क्व, विज्ञानम् अहं ब्रह्मास्मीति निदिध्यासनं च क्व। धनादिविज्ञानान्तेष्वपि मम वाञ्छा नास्तीत्यर्थः ॥ २ ॥

विज्ञात इति। देहेन्द्रियादीनां साक्षिपुरुषे त्वं पदार्थे, परमात्मनि च ईश्वरे तत्पदार्थे, विज्ञाते ब्रह्माऽहमस्मीति साक्षात्कृते सति, नित्यनिर्मुक्तचिद्रूपात्मतानुभवात् बन्धमोक्षेऽपि नैराश्ये सति, मम मुक्त्यर्थं न चिन्ता ॥ ३ ॥

ननु प्रमादाद्भावभावनः कथं शान्त इत्याशङ्क्याह अन्तर्विकल्प इति। अन्तःकरणे विकल्पशून्यस्य, बहिः भ्रान्तस्येव

अथ तत्त्वोपदेशविंशतिवर्णनम् नाम पञ्चदशप्रकरणम् ।

यथा तथोपदेशेन कृतार्थः सत्त्वबुद्धिमान् ।
आजीवमपि जिज्ञासुः परस्तत्र विमुह्यति ॥ १ ॥
मोक्षो विषयवैरस्यं बन्धो वैषयिको रसः ।
एतावदेव विज्ञानं यथेच्छसि तथा कुरु ॥ २ ॥

स्वच्छन्दचारिणः ज्ञानिनो दयास्पदीभूता एव प्राणिन एव, जायते ॥ ४ ॥

इति शिष्यप्रोक्तं शान्तिचतुष्टयं नाम चतुर्दशप्रकरणं समाप्तम् ।

दुर्लक्ष्यमात्मनस्तत्त्वं प्रत्याययितुमञ्जसा ।
मुमुक्षुस्तत्त्वोपदेशार्थं गुरुराह दयोदधिः ॥

यद्यपि प्रथममात्मतत्त्वोपदेशः कृत एव, तथापि तदात्मतत्त्वमन्तेवासिभ्यः शिष्येभ्यः पुनः पुनरुपदेष्टव्यं दुर्लक्ष्यत्वात्, यथा छान्दोग्योपनिषदि नवकृत्वः श्वेतकेतुं प्रति आचार्यः शिष्यार्थमसकृदात्मोपदेशं गुरुराह, तत्रादौ ज्ञानाधिकारिणमनधिकारिणं चाह यथा तथा इति । सत्त्वबुद्धिमान् शिष्यो, यथा तथा आपाततोऽपि उपदेशेन कृतार्थः स्यात्, अतएव, कृतयुगे प्रथमात्मोपदेशादपि शिष्याः कृतार्थाः बभूवुः, परः असत्त्वबुद्धिः, यावज्जीवं जिज्ञासुः अपि, बहुधा उपदिष्टोऽपि विमुह्यति, यथा विरोचनो ब्रह्मणा बहुधा उपदिष्टोऽपि मुमोहैवेत्यर्थः ॥ १ ॥

अथ बन्धमोक्षौ सुखोपायेन संक्षेपेण निरूपयति मोक्ष इति । विषयेषु अनुरागाभाव एव मोक्षः, विषयेषु अनु-

वाग्मिप्राज्ञमहोद्योगं जनं मूकजडालसम् ।
करोति तत्त्वबोधोऽयमतस्त्यक्तो बुभुक्षुभिः ॥ ३ ॥
न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान् ।
चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखं चर ॥ ४ ॥
रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन ।
निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर ॥५॥

रागस्तु बन्ध इत्यर्थः । एवं तावदेव बन्धमोक्षयोः निर्दिष्टम् उत्कृष्टं ज्ञानम्, एवं ज्ञात्वा च त्वम्, यथा इच्छसि तथा कुरु ॥२॥

इदं तु विषयवैरस्यं तत्त्वबोधसाध्यमित्याह वाग्मि इति । अयं प्रसिद्धः, प्राप्ततत्त्वबोधः, वाग्मिनं जनं बहुचतुरवाक्यभाषिणम्, मूकं करोति, प्राज्ञं नानाविधविषयवेदिनं जनं जडं करोति, महोद्योगं नानाक्रियानुष्ठानशालिनं अलसं निष्क्रियं करोति, मनसः प्रत्यक् प्रवणतया रागादयः कुण्ठिता भवन्ति, ज्ञानी तद्रहितो भवतीत्यर्थः, यतोऽयं तत्त्वबोधः रागादीन् कुण्ठितान् करोति अतो भोगेच्छुभिः त्यक्तः, अनादृत इत्यर्थः ॥ ३ ॥

तत्त्वबोधविचारमुपदिशति न त्वम् इति । त्वं देहादिरूपो न भवसि, यतः चिद्रूपोऽसि, न ते तव देहसंबन्धः । "असङ्गो ह्ययं पुरुषः" इति श्रुतेः, न वा भवान् कर्ता भोक्ता, यतः कर्तृभोक्तृप्रभृतीनां सदा साक्षी, यो यत् साक्षी स तद्भिन्नः, यथा घटसाक्षी घटाद्भिन्न इत्यर्थः । अतस्त्वं देहतत्सम्बन्धिषु अनपेक्षः सन्, सुखं चर इत्यर्थः ॥ ४ ॥

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
विज्ञाय निरहङ्कारो निर्ममस्त्वं सुखी भव ॥ ६ ॥
विश्वं स्फुरति यत्रेदं तरङ्गा इव सागरे।
तत्त्वमेव न सन्देहश्चिन्मूर्ते! विज्वरो भव ॥ ७ ॥
श्रद्धत्स्व तात! श्रद्धत्स्व नात्र मोहं कुरुष्व भोः!।
ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः ॥ ८ ॥

रागद्वेषौ तु मनोधर्मौ न तु तव धर्मौ, मनस्तु कदाचिदपि तव सम्बन्धि न भवति, अतस्तदध्यासाद्रागाद्यध्यासं मा कुरु इत्यर्थः। ननु रागद्वेषौ ममैव धर्मौ, कथं न इत्याशङ्क्याह निर्विकल्प इति। यतस्त्वं निर्विकल्पः बोधात्मा च असि अतो रागादिविकाररहितः सन्, सुखं चर इत्यर्थः ॥ ५ ॥

सर्वं इति। सर्वभूतेषु कारणत्वेन अनुस्यूतम् आत्मानं विज्ञाय विभाव्य, सर्वभूतानि आत्मनि अध्यस्तानि इति विभाव्य अहङ्कारादेः सर्वस्य आत्मत्वेन एव स्फुरणादहं ममाभिमानरहितः त्वं सुखी भव ॥ ६ ॥

सर्वभूतानि च आत्मनि इत्येतद्विशदयति विश्वम् इति। यत्र इदं विश्वम्। सागरे तरङ्गा इव अधिष्ठानाभिन्नं तत् चैतन्यम्, त्वमेव, अतःकारणात् हे चिन्मूर्ते, त्वं विज्वरो भव, चिदात्मोऽहमित्यनुभवाविहतसर्वसन्तापो भव इत्यर्थः ॥ ७ ॥

परमश्रद्धेयविषयतया पुनः पुनर्बोधयति श्रद्धत्स्व इति। श्रद्धत्स्व तात! श्रद्धत्स्व। अत्र चिद्रूपतायामसम्भावनाविपरीतभावनारूपं मोहं मौढ्यमविवेकं मा कुरुष्व मा कार्षीरित्यर्थः।

गुणैः संवेष्टितो देहस्तिष्ठत्यायाति याति च।
आत्मा न गन्ता नागन्ता किमेनमनुशोचसि ॥ ९ ॥
देहस्तिष्ठतु कल्पान्तं गच्छत्वद्यैव वा पुनः।
क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः ॥१०॥
त्वय्यनन्तमहाम्भोधौ विश्ववीचिः स्वभावतः।
उदेतु वास्तमायातु न ते वृद्धिर्न वा क्षतिः ॥११॥

मा कुरुष्व यतेत्युक्तं विषयदर्शितं ज्ञान इति। ज्ञानस्वरूपः प्रकृतिः परब्रह्म, जीवस्वरूपम्, भगवान् तत्पदार्थः, तथा आत्मा त्वं पदार्थः ॥ ८ ॥

गुणैः इति। गुणैः इन्द्रियादिभिः, संवेष्टितो देहः, स्वस्थो तिष्ठति, तथा किञ्चित्कालं आयाति तथा किञ्चित् कालं याति च गच्छति। देहादिभिन्न आत्मा तु न गन्ता, न अपि आगन्ता, अतोऽहं गन्ताऽहं मरिष्यामीत्येवम् एनं किं शोचसि, देहधर्मैरात्मानं मा कुरुष्व ॥ ९ ॥

नापि देहस्थितत्त्वात् भ्रान्तिस्था तव वृद्धिर्हानिर्वा इत्याह देह इति। नित्यचिन्मात्ररूपिणः तव देहस्थित्या न वृद्धिः, न वा देहनिवृत्त्या हानिः इत्यर्थः ॥ १० ॥

त्वयि इति। विश्वाख्या वीचिः यदि स्वभावतः अविद्याख्यकर्मतः। त्वयि अनन्तचित्समुद्रे, उदेतु उद्गच्छतु अस्तमायातु एतावताऽपि, ते तव, न वृद्धिः न वा क्षतिः, तथा-अनन्तत्वादित्यर्थः ॥ ११ ॥

तात ! चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत् ।
अतः कस्य कथं कुत्र हेयोपादेयकल्पना ॥१२॥
एकस्मिन्नव्यये शान्ते चिदाकाशेऽमले त्वयि ।
कुतो जन्म कुतो कर्म कुतोऽहङ्कार एव च ॥१३॥
यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे ।
किं पृथक् भासते स्वर्णात् कटकाङ्गदनूपुरम् ॥१४॥
अयं सोऽहमयं नाहं विभागमिति सन्त्यज ।
सर्वमात्मेति निश्चित्य निःसङ्कल्पः सुखी भव ॥१५॥

तात इति। सर्वस्य त्वदभिन्नत्वात् किं हेयमुपादेयं कस्य केन वा प्रकारेण हेयमुपादेयम्, कुत्र वा हेयमुपादेयमित्यर्थः ॥ १२ ॥

एकस्मिन् इति। एकस्मिन् सजातीयविजातीयस्वगतभेदशून्ये, अव्यये विनाशरहिते, शान्ते कार्यशून्ये, चिदाकाशे अमले च च सर्वोपाधिशून्ये च, त्वयि, कुतो जन्म, कुतः च कर्म, कुतश्च अहङ्कारः, द्वितीयस्य हेतोरभावात्, जन्मनश्च जनकाभावात्, कार्यशून्यस्य च कर्मकर्तृत्वासम्भवाद्, निर्मलस्य चाहङ्कारासम्भवादित्यर्थः ॥ १३ ॥

एकत्वमुपपादयति यत्त्वम् इति। यद् यद् वस्तु त्वं पश्यसि तत्र कारणरूपः त्वमेव एकः प्रतिभाससे, कटकाङ्गदादौ स्वर्णवदित्यर्थः ॥ १४ ॥

अयं सोऽहम् इति। "कारणरूप आत्मा एव सर्वम्" इति निश्चित्य, भेदभ्रमं त्यज, तथा च निर्विकल्पो निजात्मना-

त्वय्येव व्याप्ततो विश्वं त्वमेकः परमार्थतः।
ततोऽन्यो नास्ति संसारी नासंसारी च कश्चन॥१६॥

भ्रान्तिमात्रमिदं विश्वं न किञ्चिदिति निश्चयी।
निर्वासनः स्फूर्तिमात्रो न किञ्चिदिव शाम्यति॥१७॥

एक एव भवाम्भोधावासीदस्ति भविष्यति।
न ते बन्धोऽस्ति मोक्षो वा कृतकृत्यः सुखं चर॥१८॥

मा सङ्कल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय!।
उपशाम्य सुखं तिष्ठ स्वात्मन्यानन्दविग्रहे॥१९॥

प्रतिभासः सन् सुखी भव। द्वितीयप्रतिभासादि दुःखं भवतीत्यर्थः॥ १५॥

विभागत्यागे युक्तिमाह त्वय्येवेति। त्वय्येव व्याप्ततो विश्वं विश्वाकारविक्षेपः, अतः परमार्थतः त्वमेकः, अतः संसारी असंसारी च त्वत्तो न अन्यः कश्चिदित्यर्थः॥ १६॥

भ्रान्तिमात्रम् इति। इदं विश्वं भ्रान्तिमात्रमिदम्। अतो हेतोः न किञ्चित् पृथक् सत्तावदिदमित्यर्थः, इति निश्चयी, अतएव सर्वस्य निरस्तत्वात् निर्वासनो वासनारहितः, स्फूर्तिमात्रः सन् न किञ्चिदिव निरस्ताशेषविक्षेपः सन्, शाम्यति॥१७॥

एक एव इति। कालत्रयेऽपि भवाम्भोधौ एकः त्वम् एव। अतएव बन्धमोक्षौ न स्तः। अतस्त्वं कृतकृत्यः सन् सुखं चर॥ १८॥

मा सङ्कल्प इति। हे चिन्मय! त्वं सङ्कल्पविकल्पाभ्यां चित्तं

त्यजैव ध्यानं सर्वत्र मा किञ्चिद्धृदि धारय।
आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि॥२०॥

मा क्षोभय, उपशाम्य उपरतसङ्कल्पविकल्पो भव, आनन्दरूपे आत्मनि सुखं तिष्ठ ॥ १८ ॥

ध्यानमपि त्यजेत्याह त्यज इति।

सर्वत्र ध्यानं त्यज कुत्रापि ध्यानं मा कार्षीरित्यर्थः।

एतदेव विशदयति मा किञ्चित्हृदि धारय इति।

मननमपि त्यजेत्याह। आत्मा इति। आत्मा त्वं सदा मुक्त एवासि, अतो विमृश्य विचार्य, किं फलं करिष्यसि नित्यमुक्तत्वादित्यर्थः ॥ २० ॥

इति तत्त्वोपदेशविंशतिकं नाम पञ्चदशप्रकरणं समाप्तम्।

अथ विशेषोपदेशकं नाम षोडशप्रकरणम् ।

आचक्ष्व शृणु वा तात ! नानाशास्त्राण्यनेकशः ।
तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥ १ ॥
भोगं कर्म समाधिं वा कुरु विज्ञ ! तथापि ते ।
चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति ॥ २ ॥
आयासात् सकलो दुःखी नैनं जानाति कश्चन ।

पृथक्सत्त्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनम् ।
तृष्णाद्यनर्थविच्छेदद्वारेणात्र वर्ण्यते ॥

तत्त्वज्ञानेन सर्वप्रपञ्चस्य पृथक्सत्तया विस्मरणकारणेनैव तृष्णापायादिद्वारा मुक्तिर्भवतीति विशेषमुपदिशति आचक्ष्व इति । हे तात ! त्वं नानाशास्त्राणि अनेकशः अनेकवारं शिष्येभ्यः आचक्ष्व, गुरुभ्यः शृणु वा, तथापि तव सर्वविस्मरणादृते स्वास्थ्यं श्रेयो नास्तीत्यर्थः । ननु सुषुप्तौ सर्वविस्मरणं सर्वेषां विद्यत एव, तेन सर्वेषां मोक्षः स्यादिति व्यर्थं सर्वविस्मरणमिति चेत्, सत्यं, सुषुप्तौ तु यद्यपि विषयविस्मरणमस्ति, तथापि अज्ञानविस्मरणं नास्ति इति सर्वविस्मरणाभावात्, जीवन्मुक्तस्य तु अज्ञानादेः सर्वस्याधिष्ठानानुसन्धानरूपं विस्मरणमस्तीति भावः ॥ १ ॥

सर्वविस्मरणे सति सर्वस्वरूपं बोधं चित्तं निरस्तसर्वाशं भवति इति सूचयन्नाह । भोगम् इति । हे विज्ञ ! त्वं भोगं कुरु कर्म वा कुरु समाधिं वा कुरु । तथापि चित्तमत्यर्थं रोचयिष्यति स्वरूपे रुचिमुत्पादयिष्यति । कीदृशं चित्तं निरस्तसर्वाशं सर्वविस्मरणे सति सर्वाशानुदयादित्यर्थः ॥ २ ॥

अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिम् ॥ ३ ॥
व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि ।
तस्यालस्यधुरीणस्य सुखं नान्यस्य कस्यचित् ॥४॥
इदं कृतमिदं नेति द्वन्द्वैर्मुक्तं यदा मनः ।
धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत् ॥ ५ ॥
विरक्तो विषयद्वेष्टा रागी विषयलोलुपः ।
ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान् ॥ ६ ॥

सर्वतृष्णाविलये सति तु कृतेनापि कर्मणा दुःखहेतुरायासो न भवतीति सूचयन्नाह । आयासात् इति । सकलो जनः आयासात् एव दुःखी भवति । परन्तु कश्चन एनं आयासम् न जानाति दुःखहेतुरयमिति न वेत्ति ।

अनेन इति । आयासात् सकलो दुःखीति अनेनैवोपदेशेन धन्यः सुकृती, निर्वृतिं परमसुखं प्राप्नोति ॥ ३ ॥

व्यापारानासक्तिः सुखहेतुरित्याह व्यापार इति । यो निमेषोन्मेषयोरपि व्यापारे खिद्यते अनासक्तो भवति, तस्य आलस्यधुरीणस्य क्रियाभिनिवेशरहितस्य सुखं, न अन्यस्य क्रियाभिनिवेशयुक्तस्य ॥ ४ ॥

सर्वतृष्णाविलये सति द्वन्द्वहानिरपि भवतीति सूचयन्नाह इदं कृतम् इति । इदं कृतमिदं न इति आदि द्वन्द्वैर्मुक्तं यदा मनो भवति, तदा पुरुषार्थचतुष्टयेऽपि निरपेक्षं भवेत् । द्वन्द्वातीतस्य जीवन्मुक्तत्वात् इत्यर्थः ॥ ५ ॥

पुरुषार्थकामनानिरपेक्षस्तु विरक्तकामुकाभ्यां विलक्षण इत्याह विरक्त इति । मुमुक्षुः सन् यो विषयद्वेष्टा स विरक्तः

हेयोपादेयता तावत् संसारविटपांकुरः।
स्पृहा जीवति यावद्वै निर्विचारदशास्पदम् ॥७॥
प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि।
निर्द्वन्द्वो बालवद्धीमानेवमेव व्यवस्थितः ॥ ८ ॥
हातुमिच्छति संसारं रागी दुःखजिहासया।

कथ्यते। कामनासापेक्षः सन् यो विषयलोलुपः स रागी इति कथ्यते, यस्तु बन्धमोक्षविहीनः बन्धमोक्षेच्छाभ्यां विहीनः, स विरक्तानुरक्ताभ्यां विलक्षणः सर्वतो निरपेक्षतया हानोपादानेच्छारहितत्वादित्यर्थः ॥ ६ ॥

ननु ज्ञानिनोऽपि हानोपादानादिव्यवहारो दृश्यते इति तत्राह हेयोपादेयता इति। निर्विचारदशास्पदम् अविवेकदशास्पदीभूता, स्पृहा, तृष्णा, यावत् जीवति, तावत्पर्यन्तमेव हेयोपादेयता हेयोपादानादिव्यवहारः, संसार-वृक्षस्य शाखाऽङ्कुरो भवति, ज्ञानिनां तु स्पृहाभावे सत्यपि हानोपादानादिव्यवहारे संसारशाखाप्रसरो न भवति इत्यर्थः ॥ ७ ॥

प्रवृत्तौ इति। प्रवृत्तौ सरागप्रवृत्तौ सत्याम् उत्तरोत्तरं विषयेषु रागो जायते। विषयेऽपि द्वेषपूर्वकनिवृत्तौ सत्याम् उत्तरोत्तरं विषयेषु द्वेष एव हि जायते, अतो धीमान् ज्ञानी, बालवत् शुभाशुभानुसन्धानरहितः, निर्द्वन्द्वः रागद्वेषविहीनः सन् एव, रागजनितप्रवृत्तिद्वेषजनितनिवृत्तिरहित एव स्थितः केवलं प्रारब्धवशात् एव कदाचित्प्रवर्तते कदाचिन्निवर्तते च। न तु रागद्वेषवशात् इत्यर्थः ॥ ८ ॥

हातुमिच्छति इति। यस्तु रागी स दुःखजिहासया संसारं

वीतरागो हि निर्दुःखस्तस्मिन्नपि न खिद्यति ॥९॥
यस्याभिमानो मोक्षेऽपि देहेऽपि ममता तथा ।
न च ज्ञानी न वा योगी केवलं दुःखभागसौ ॥१०॥
हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा ।
तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥ ११ ॥

अथ तत्त्वज्ञस्वरूपविंशतिकं नाम सप्तदशप्रकरणं प्रारभ्यते ।

तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा ।
तृप्तः स्वच्छेन्द्रियो नित्यमेकाकी रमते तु यः ॥ १॥

ज्ञातुमिच्छति, वीतरागः तु निर्दुःखः रागोत्थदुःखरहितत्वात् तस्मिन् संसारे सति अपि न खिद्यति खेदं न प्राप्नोति ॥ ९ ॥

यस्याभिमान इति । अहं ज्ञानी त्रिकालवृत्तान्तदर्शी मुक्त इत्येवं यस्य मोक्षेऽपि अभिमानो न असौ ज्ञानी, तथा च, अहं योगाभ्यासी देहस्यैव गुणकर्मधर्मरतः, मम देहो वज्राहारोपवासादिसमर्थं इत्येवं देहेऽपि अभिमानो न असौ योगी न वा ज्ञानी, केवलं असौ दुःखभाक् दुःखहेतुत्वहममाभिमानानिवृत्तेरित्यर्थः ॥ १० ॥

सर्वविस्मरणोपदेशमुपसंहरति हर इति । स्पष्टम् ॥ ११ ॥

इति विशेषोपदेशं नाम षोडशप्रकरणम् ।

अथातः श्लोकविंशत्या तत्त्वज्ञस्य दशोच्यते ।
विद्यातत्त्वप्रकर्षस्य व्यक्तये गुरुणा स्फुटम् ॥

अथ अन्येषामपि विद्यायां प्रवृत्त्यै तत्त्वज्ञानफलं व्याख्यातुमिच्छया तत्त्वज्ञदशां गुरुर्निरूपयति तेन इति । तेन एव

न कदाचिज्जगत्यस्मिन् तत्त्वज्ञो हन्त खिद्यति॥
यत एकेन तेनेदं पूर्णं ब्रह्माण्डमण्डलम् ॥ २ ॥
न जातु विषयाः केऽपि स्वारामं हर्षयन्त्यमी।
सल्लकीपल्लवप्रीतमिवेभं निम्बपल्लवाः ॥ ३ ॥
यस्तु भोगेषु भुक्तेषु न भवत्यधिवासिता।
अभुक्तेषु निराकाङ्क्षी तादृशो भवदुर्लभः ॥ ४ ॥
बुभुक्षुरिह संसारे मुमुक्षुरपि दृश्यते।

ज्ञानफलं प्राप्तं, य आत्मन्येव रतो न भोगादिना, अतएव स्वस्थेन्द्रियो विषयाणामनभिज्ञेन्द्रियः सन् एकाकी विषयसंयोगं विनैव नित्यं आत्मन्येव रमते ॥ १ ॥

न कदाचित् इति। हन्त इति सहर्षसम्बोधने, हे शिष्य! अस्मिन् जगति कदाचित् अपि तत्त्वज्ञो न खिद्यते, यत एकेन एव तेनेदं ब्रह्माण्डमण्डलं पूर्णं व्याप्तम् अतो द्वितीयस्याभावात् न खिद्यतीत्यर्थः ॥ २ ॥

न जातु इति। स्वस्मिन्नात्मन्येव आरमते तं स्वारामं, जातु कदाचित् अमी विषयाः न हर्षयन्ति तुच्छत्वात्, स्वस्वरूप-सत्तामप्राप्येव रमते तं स्वारामं जातु कदाचित् अमी विषया न हर्षयन्ति इन्द्रियरहितत्वात्। यथा सल्लकीपल्लवप्रीतम्, इभं गजं, निम्बपल्लवा न हर्षयन्ति कटुकत्वात् इत्यर्थः ॥ ३ ॥

यस्तु इति। यस्य तु भुक्तेषु भोगेषु आसक्तिर्न भवति, अभुक्तेषु आकाङ्क्षा न भवति आत्मज्ञानत्वात् तादृशो भवदुर्लभः संसारसागरे कोटिष्वेव इत्यर्थः ॥ ४ ॥

बुभुक्षुः इति। संसारे बुभुक्षुर्मुमुक्षुः च अनेकधा दृश्यते।

भोगमोक्षनिराकाङ्क्षी विरलो हि महाशयः ॥ ५ ॥

धर्मार्थकाममोक्षेषु जीविते मरणे तथा ।
कस्याप्युदारचित्तस्य हेयोपादेयता न हि ॥ ६ ॥

वाञ्छा न विश्वविलये न द्वेषस्तस्य च स्थितौ ।
यथा जीविकया तस्माद्धन्य आस्ते यथासुखम् ॥७॥

कृतार्थोऽनेन ज्ञानेनेत्येवं गलितधीः कृती ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखम् ८

भोगमोक्षनिराकाङ्क्षी महति पूर्णे ब्रह्मणि आशयोऽन्तःकरणं यस्य स महाशयो विरलः । "यततामपि सिद्धानां कश्चित् मां वेत्ति तत्त्वतः" इति भगवद्वचनात् ॥ ५ ॥

धर्मार्थ इति । पुरुषार्थचतुष्टये तथा जीवितमरणयोर्यथायोग्यं हेयोपादेयतारहितो विरल इत्यर्थः ॥ ६ ॥

वाञ्छा इति । यस्मात् ज्ञानिनो विश्वविलये प्रपञ्चोपरमे वाञ्छा न अस्ति, तस्य प्रपञ्चस्य स्थितौ च द्वेषः न अस्ति, अधिष्ठानत्वेनैव ब्रह्मरूपात्मस्फुरणात्, तस्मात् कारणात्, धन्यो यो विद्वानारब्धवशात् प्राप्तया यथा प्राप्तया जीविकया सुखम् अनतिक्रम्यैव आस्ते इत्यर्थः ॥ ७ ॥

कृतार्थ इति । अहम् अनेन अद्वैतात्मज्ञानेन कृतार्थः इत्येवं गलितधीः कृती श्रवणादिकं कुर्वन्नपि, सुखम् अनतिक्रम्य आस्ते कृतार्थत्वधियः सत्वाद्बहिरिन्द्रियव्यापारे सत्यपि अज्ञानिन इव विरक्तस्य तस्य खेदो न भवति । "उपविष्टो व्रजन् तिष्ठन् तन्मयः स्यात् समाहितः" इति वचनात् न भवति इत्यर्थः ॥ ८ ॥

शून्या दृष्टिर्वृथा चेष्टा विकलानीन्द्रियाणि च।
न स्पृहा न विरक्तिर्वा क्षीणसंसारसागरे॥ ९॥
न जागर्ति न निद्राति नोन्मीलति न मीलति॥
अहो परदशा क्वापि वर्तते मुक्तचेतसः॥ १०॥
सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः।
समस्तवासनामुक्तो मुक्तः सर्वत्र राजते॥ ११॥

शून्या इति। क्षीणः संसारसागरो यस्य सः तस्मिन् क्षीणसंसारसागरे पुरुषे, स्पृहा विषयेष्वपि न विरक्तिः च न। अतः तस्य मनःकायेन्द्रियव्यापारो बालोन्मत्तादिवत् इत्याह शून्येति। तस्य दृष्टिर्मनोव्यापारः शून्या संकल्पविकल्परहिता, चेष्टा कायव्यापारः। वृथा फलमनुद्दिश्यैव तस्य इन्द्रियाणि विकलानि पुरःस्थितानामपि विषयाणामनिर्णायकत्वात् तदुक्तं भगवद्गीतायां "यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" इति॥ ९॥

न जागर्ति इति। ज्ञानी न जागर्ति जाग्रदवस्थावान् न भवति। अत्र बहिर्विषयाननुसन्धानादिति हेतुमाह नोन्मीलति इति। बाह्यविषयान् नानुसन्धत्ते इत्यर्थः। तथा ज्ञानी न निद्राति यतः न निमीलति अज्ञजनवत्, सर्वान् विषयान् ब्रह्मत्वेन पश्यतीत्यर्थः। का तर्हि तस्य दशेत्यत आह अहो इति। अहो इति आश्चर्ये मुक्तचेतसः क्वापि अलौकिकी परदशा तत्त्वज्ञदशा तुरीयातीतेत्यर्थः॥ १०॥

इदमेव विशदयति सर्वत्र इति। सर्वत्र सुखे दुःखे च स्वस्थः स्वस्थचित्तः। तथा सर्वत्र एव शत्रौ मित्रे च विमलाशयः

पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गृह्णन् वदन् व्रजन्
ईहितानीहितैर्मुक्तो मुक्त एव महाशयः ॥ १२ ॥
न निन्दति न च स्तौति न हृष्यति न कुप्यति ।
न ददाति न गृह्णाति मुक्तः सर्वत्र नीरसः ॥१३॥
सानुरागां स्त्रियं दृष्ट्वा मृत्युं वा समुपस्थितम् ।
अविह्वलमनाः स्वस्थो मुक्त एव महाशयः ॥१४॥
सुखे दुःखे नरे नार्य्यां सम्पत्सु च विपत्सु च ।
विशेषो नैव धीरस्य सर्वत्र समदर्शिनः ॥ १५ ॥
न हिंसा नैव कारुण्यं नौद्धत्यं न च दीनता ।

समानदर्शी, यतः समस्तविषयवासनाभ्यो मुक्तः, अतएव मुक्तः सर्वत्र सर्वासु दशासु राजते दीप्यते पूर्णात्मदर्शित्वात् ॥ ११ ॥

पश्यन् इति । प्रारब्धवशाद्दर्शनादिकं बहिरिन्द्रियव्यापारं कुर्वन्नपि ईहितानीहितैः इच्छाद्वेषैः मुक्तो महाशयो महति आत्मनि आशयो यस्य स महाशयः मुक्त एव मनो विकारातीतत्वात् ॥ १२ ॥

इदमेव विशदयति न निन्दति इति । स्पष्टं, न स्तौति न हर्षं प्राप्नोति न चेषु कोपं करोतीत्यर्थः । कस्मैचित् न गृह्णाति सर्वत्र नीरसः मुक्त इत्यर्थः ॥ १३ ॥

किञ्च सानुरागाम् इति । सानुरागां स्त्रियं दृष्ट्वा अथ वा समुपस्थितं मृत्युं दृष्ट्वा अविह्वलमनाः कामभयाभ्यां विमुक्तमनाः महाशयो मुक्त एव ॥ १४ ॥

किञ्च सुखे इति । स्पष्टम् ॥ १५ ॥

न हिंसा इति । जीवसंसारत्वे अमरे नराभिमानरहिते

नाश्चर्यं नैव च क्षोभः क्षीणसंसरणेऽन्तरे ॥१६॥

न मुक्तो विषयद्वेष्टा न वा विषयलोलुपः।

असंसक्तमना नित्यं प्राप्तं प्राप्तमुपाश्नुते ॥ १७ ॥

समाधानासमाधानहिताहितविकल्पनाः।

शून्यचित्तो न जानाति कैवल्यमिव संस्थितः ॥१८॥

निर्ममो निरहङ्कारो न किञ्चिदिति निश्चितः।

अन्तर्गलितसर्वाशः कुर्वन्नपि करोति न ॥ १९ ॥

मनःप्रकाशसम्मोहस्वप्नजाड्यविवर्जितः।

दशां कामपि सम्प्राप्तो भवेद्गलितमानसः ॥२०॥

विद्धि, हिंसा नाम परद्रोह इत्यादयो मनोविकारा न भवन्तीत्यर्थः ॥ १६ ॥

न मुक्त इति। जीवन्मुक्तः विषयद्वेष्टा अपि न, न वा विषयलोलुपः किं तर्हि असंसक्तमनाः सन् प्रारब्धवशात् प्राप्तं प्राप्तमुपाश्नुते भुङ्क्ते इत्यर्थः ॥ १७ ॥

समाधाना इति। यतिः शून्यचित्तो ज्ञानी, समाधानादिविविधाः कल्पना न जानाति स्वयं सदा विदेहकैवल्यं प्राप्त इव ॥ १८ ॥

निर्मम इति। अहं ममाभिमानशून्यतया अविद्याजनितमिदं "किञ्चित् न सत्" इति निश्चयवान्, अतएव अन्तर्गलितसर्वाशः, अतएव कुर्वन्नपि न करोति कर्तृत्वाभिमानरहितत्वात् इत्यर्थः ॥ १९ ॥

मन इति। गलितं सविशेषवृत्तिहीनं मानसं यस्य स ज्ञानी, कामपि अनिर्वाच्यां दशां सम्प्राप्तो भवेत्। तदेव दर्श-

अथ शान्तिशतकं नाम अष्टादशप्रकरणम् ।

यस्य बोधोदये तावत् स्वप्नवद्भवति भ्रमः ।
तस्मै सुखैकरूपाय नमः शान्ताय तेजसे ॥ १ ॥
अर्जयित्वाऽखिलानर्थान् भोगानाप्नोति पुष्कलान् ।
न हि सर्वपरित्यागमन्तरेण सुखी भवेत् ॥ २ ॥

यति मनःप्रकाशविवर्जितः । सविशेषप्रकाशाभावात्, तथा सङ्कोचवर्जितः प्रत्यक्प्रवणचित्तत्वात् । अतएव प्रवर्जितः जाड्येन पटुतया च विवर्जित इत्यर्थः ॥ २० ॥

इति तत्त्वस्वरूपविंशतिकं नाम सप्तदशप्रकरणम् ।

तत्त्वाभिज्ञे फलीभूतशमस्यैव प्रधानताम् ।
व्याख्यातुं वर्ण्यते शान्तिः शतश्लोकैः पुनः स्फुटम् ॥

तत्र तावत् शान्तेः प्रधानतां ख्यापयितुं फलीभूतां शान्तिं वर्णयितुकामः, शान्तिशालिनं नमस्करोति यस्य इति । बोधोदये सति तावत् तत्क्षणमेव प्रपञ्चभ्रमः, स्वप्नवत् तुच्छो यस्य जातो भवति । तस्मै शान्ताय निवृत्तसङ्कल्पविकल्पाय अतएव सुखैकरूपाय दुःखाननुविद्धसुखस्वभावाय अतएव तेजसे स्वप्रकाशाय विदुषे नमः ॥ १ ॥

ननु धनिनोऽपि सुखिनो दृश्यन्ते तत्कथं शान्तसङ्कल्प एव सुखैकरूप इत्याशङ्क्याह अर्जयित्वा इति । अखिलान् अर्थान् धनधान्यकान्तादीन् अर्जयित्वा, पुष्कलान् बहुविधान् भोगान् एव आप्नोति । न तु सुखैकरूपः स्यात् तत्क्षये दुःखभागित्वात् सर्वपरित्यागमन्तरेण सर्वसङ्कल्पविकल्पत्यागं विना, सुखैकरूपो न हि भवति नैव स्यात् ॥ २ ॥

कर्तव्यदुःखमार्तण्डज्वालादग्धान्तरात्मनः ।
कुतः प्रशमपीयूषधारासारमृते सुखम् ॥ ३ ॥
भवोऽयं भावनामात्रो न किञ्चित् परमार्थतः ।
नास्त्यभावः स्वभावानां भावाभावविभाविनाम् ॥ ४
न दूरं न च सङ्कोचाल्लभ्यमेवात्मनः पदम् ।

सङ्कल्पविकल्पयोस्तुच्छत्वज्ञानमेव त्यागमात्रस्य तत्त्वात् । यथा वन्ध्यापुत्रे तुच्छत्वज्ञानमेव त्यागः अतः त्यागलक्षणात्, इदमेव रूपकालङ्कारेण विशदयति कर्तव्य इति । कर्तव्यानि यानि कर्माणि, तज्जनितानि दुःखानि एव मार्तण्डज्वाला ज्वलत्सूर्यतापस्तेन दग्धः अन्तरात्मा मनो यस्य तस्य सङ्कल्प-विकल्पप्रशमामृतधारासारं विना सुखं कुतः स्यात् ॥३॥

सङ्कल्पविकल्पप्रशमस्य अत्यन्तं संसाररूपविषनिवर्तक-त्वात् इत्याशयेनाह भवोऽयम् इति । अयं भवः भावनामात्रः सङ्कल्पमात्रप्रभवः, परमार्थतः आत्मव्यतिरिक्तं किञ्चित् न अस्ति परमार्थतस्तु आत्मैव भावरूपः । न तु अभावरूपः । ननु अभावरूपोऽपि प्रपञ्चः कालादिवशात् भावस्याभाव इत्याशङ्क्याह नास्ति इति । भावाभावेषु विभाविनां स्थितानाम्, स्वभा-वानाम् अभावो नास्ति । न हि उष्णस्वभावो वह्निः कदाचि-दपि शीतस्वभावो दृष्टः । तथा च मनोराज्यवद्भावनामात्र-सिद्धः सत्स्वभावः प्रपञ्चो भावनानिवृत्तौ निवर्तत इति सङ्कल्पप्रशमसंसारविषतापापगमात् आत्मामृतप्राप्तिहेतुत्वात् सुखतममिति भावः ॥ ४ ॥

ननु सङ्कल्पोपशममात्रेण कथमात्मामृतप्राप्तिरित्याशङ्क्य

निर्विकल्पं निरायासं निर्विकारं निरञ्जनम् ॥५॥
व्यामोहमात्रविरतौ स्वरूपादानमात्रतः ।
वीतशोका विराजन्ते निरावरणदृष्टयः ॥ ६ ॥
समस्तं कल्पनामात्रमात्मा मुक्तः सनातनः ।
इति विज्ञाय धीरो हि किमभ्यस्यति बालवत् ॥७॥
आत्मा ब्रह्मे ति निश्चित्य भावाभावौ च कल्पितौ ।

तस्य नित्यप्राप्तत्वमाह न दूरम् इति । आत्मनः पदं स्वरूपं दूरं न अस्ति । न अपि सङ्कोचात् वर्त्तते परिच्छिन्नं नास्ति, परिपूर्णत्वात् । अत एवात्मनः पदं नित्यलब्धं प्राप्तमेवास्ति । सङ्कल्पवशात् पुनरप्राप्तमिवाविद्वांसो मन्यन्ते, कण्ठगतचामीकरवत् । कीदृशं पदं, निर्विकल्पं विकल्पातीतं विकल्पाभावगम्यं वा, तथा, निरायासम् आयासातीतं तदभावगम्यं वा, निर्विकारं विकारातीतम् । निरञ्जनम् उपाधिमलशून्यम् ॥ ५ ॥

कथं तर्हि तत्त्वज्ञानेन तत्प्राप्तिव्यवहारः शास्त्रकारणमित्याशङ्क्य भ्रान्तिनाशमात्रादेवेत्याह व्यामोह इति । ज्ञानेन निरावरणदृष्टयः अविद्यानाशितदृष्टयः व्यामोहमात्रस्य प्रपञ्चभ्रान्तिमात्रस्य विरतौ सत्यां, स्वरूपादानमात्रतः आत्मविश्रान्तिमात्रतो वीतशोका विराजन्ते सर्वदा स्वभावेनैव पूर्णाद्वितीयतया प्रकाशन्त इत्यर्थः ॥ ६ ॥

आत्मज्ञानरहस्यमाह समस्तमिति । स्पष्टार्थमिदम् ॥७॥

समस्तकल्पनामात्रमिति ज्ञानस्य निदानभूतं तत्त्वं पदार्थैक्यज्ञानमाह आत्मा इति । आत्मा त्वं पदार्थः, ब्रह्म

निष्कामः किं विजानाति किं ब्रूते च करोति
किम् ॥ ८ ॥

अयं सोऽहमयं नाहमिति क्षीणा विकल्पनाः ।
सर्वमात्मेति निश्चित्य तूष्णीम्भूतस्य योगिनः ॥ ९ ॥

न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता ।
न सुखं न च वा दुःखमुपशान्तस्य योगिनः ॥ १० ॥

तत्पदार्थाभिन्न इति निश्चित्य अधिष्ठानसाक्षात्कारात् च भावाभावौ घटादिः तदभावः च कल्पितौ इति निश्चित्य, तथा च सर्वस्य तुच्छत्वानुसन्धानात् कामहेतुविषयाविलयात् च निष्कामः सन्, किं विशिष्टतया, जानाति किं ब्रूते, किं च कार्यं करोति, कर्तृत्वाभिमानरहितत्वात् ज्ञातापि न वक्तापि न क्रियाकर्तापि नेत्यर्थः ॥ ८ ॥

सर्वमात्मेति ज्ञानं सर्वकल्पनानिवर्तकमित्याह अयमिति । सर्वमात्मेति निश्चित्य अनुभूय, तूष्णीम्भूतस्य निरुद्धवाग्व्यापारस्य, योगिनः "वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि । एकीकृत्य विमुच्येत मुक्तोऽयं योग उच्यते ॥" इति योगलक्षणं मनुनोक्तम् । इति विविधाः कल्पनाः क्षीणा भवन्ति, इतीति किम् ? अहं करोमि य एवाहं पूर्वदिने यज्ञमकरवं, सोऽहं यजामि, अयं देवदत्तो गच्छति, नाहं गमिष्यामीत्यादयः कल्पनाः क्षीणा भवन्तीत्यर्थः ॥ ९ ॥

निरुद्धकल्पनस्य स्वरूपमाह । द्वाभ्यां न विक्षेप इति । उपशान्तचित्तस्य योगिनः, विक्षेपो व्यग्रता न, एकाग्रतादिकमपि नेत्यर्थः ॥ १० ॥

स्वाराज्ये भैक्ष्यवृत्तौ च लाभालाभे जने वने।
निर्विकल्पस्वभावस्य न विशेषोऽस्ति योगिनः॥११
क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता।
इदं कृतमिदं नेति द्वन्द्वैर्मुक्तस्य योगिनः ॥१२॥
कृत्यं किमपि नैवास्ति न कापि हृदि रञ्जना।
यथा जीवनमेवेह जीवन्मुक्तस्य योगिनः॥ १३ ॥
क्व मोहः क्व च वा विश्वं क्व तद्ध्यानं क्व मुक्तता।
सर्वसङ्कल्पसीमायां विश्रान्तस्य महात्मनः॥ १४ ॥

स्वाराज्य इति। स्वाराज्ये स्वर्गराज्ये, भैक्ष्यवृत्तौ च प्रारब्धवस्तुलाभे तदभावे, जने जनसमूहे, वने विजने च, विशेषो योगिनो नास्ति। कीदृशस्य विकल्परहित-स्वभावस्येत्यर्थः॥ ११ ॥

क्व धर्म इति। इदं कृतमिदं न कृतमित्यादि द्वन्द्वैर्मुक्तस्य योगिनः धर्मार्थकामाः, विवेकिता मोक्षोपायभूतो विवेकश्च न भवति, तन्मूलभूताविद्याकामसङ्कल्पादीनां विनाशादित्यर्थः॥ १२ ॥

कथं तर्हि जीवन्मुक्तस्य लोके क्रियेत्याशङ्क्य जीवनादृष्टवशादेवेत्याह कृत्यमिति। जीवन्मुक्तस्य योगिनः सङ्कल्पवशात् किमपि कृत्यं नैवास्ति तथा, हृदि मनसि कापि रञ्जना कोऽपि अनुरागो न अस्ति, तद्धेतुभूताया विद्याया अभावात्, तथापि अस्य कृत्यं यथा जीवनं जीवनादृष्टमनतिक्रम्य भवतीत्यर्थः॥ १३ ॥

क्व मोह इति। सङ्कल्पसीमायाम् आत्मबुद्धौ विश्रान्तस्य

येन विश्वमिदं दृष्टं स नास्तीति करोतु वै।
निर्वासनः किं कुरुते पश्यन्नपि न पश्यति॥ १५ ॥
येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिन्तयेत्।
किं चिन्तयति निश्चिन्तो द्वितीयं यो न पश्यति॥ १६ ॥
दृष्टो येनात्मविक्षेपो निरोधं कुरुते त्वसौ।
उदारस्तु न विक्षिप्तः साध्याभावात्करोति किम्॥ १७ ॥
धीरो लोकविपर्य्यस्तो वर्त्तमानोऽपि लोकवत्।

कोपादिकं न भवति, किं कारणमाश्रित्य भवति, न किमपि कारणमाश्रित्य भवति, पाककृता कारणोपमर्दादित्यर्थः ॥१४॥

येन इति। येन दृष्टं विश्वं घटपटादि दृष्टं, स तद्विषयक-संस्कारः कदाचित् घटादिकं नास्तीति करोतु वै नास्तीति जानातु। यः पश्यन्नपि न पश्यति स निर्वासनः सन् किं कुरुते, यद्विषयकः संस्कारोऽपि नास्ति, तस्य कर्तृत्वाभावादित्यर्थः ॥ १५ ॥

येन इति। येन परं व्यतिरिक्तं ब्रह्म दृष्टं, स परं ब्रह्मेति चिन्तयेत्, यः तु द्वितीयं न पश्यति, स निश्चिन्तः सर्वचिन्तारहितः सन् किं चिन्तयति, न किमपि चिन्तयति, अद्वितीयात्मानुभवशालिनि ब्रह्मचिन्तनमपि नास्तीत्यर्थः ॥ १६ ॥

शान्तिनश्चित्तनिरोधोऽपि नास्तीत्याह दृष्ट इति। येन आत्मविक्षेपःचित्तादिभ्रमो दृष्टः, असौ पुरुषः, चित्त-निरोधं कुरुते विक्षेपपरिहारार्थम्। उदारः सर्वत्राद्वितीयात्मदर्शी तु विक्षिप्त एव न भवति न विक्षेपपरिहारलक्षणस्य साध्याभावात्, किं कुरुते कथं निरोधं कुरुत इत्यर्थः ॥ १७ ॥

न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति ॥१८॥
भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः ।
नैव किञ्चित् कृतं तेन लोकदृष्ट्या विकुर्वता ॥१९॥
प्रवृत्तौ वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः ।
यदा यत्कर्त्तुमायाति तत्कृत्वा तिष्ठतः सुखम् ॥२०॥
निर्वासनो निरालम्बः स्वच्छन्दो मुक्तबन्धनः ।

इदमेव विवृणोति धीर इति । धीरः तुरीयात्मविश्रान्तः लोकविपर्य्यस्तः लोकेषु विक्षेपरहितः प्रारब्धवशात् लोकवद्वर्त्तमानोऽपि बाधितानुवृत्त्या व्यवहारपरो [illegible] स्वयं समाधिः अयं विक्षेपः तथा अयं विक्षेपकृतो लेप आत्मन इत्यादिकं न पश्यति । चिन्मात्रदर्शित्वात् । १८

भावाभाव इति । यो बुधस्तृप्तः स्वात्मानुभवतृप्तोऽत एव भावाभावविकारस्फूर्त्तिविहीनः, अत एव निर्वासनः, तेन लोकदृष्ट्या कुर्वतापि किञ्चित् अपि नैव कृतं स्यात् । अकर्त्तात्मज्ञानेन कर्त्तृत्वाध्यासबाधादित्यर्थः ॥ १९ ॥

इदमेव विशदयति प्रवृत्तौ वा इति । धीरस्य आत्मविश्रान्तस्य प्रवृत्तौ वा निवृत्तौ वा, दुर्ग्रहः दुराग्रहः कर्त्तृत्वाभिमानो न अस्ति कीदृशस्य धीरस्य, प्रारब्धवशात् यदा यत् प्रवृत्तं वा निवृत्तं वा कर्त्तुमायाति, तत्सुखम् अनायासं यथा स्यात्तथा कृत्वा तिष्ठतः, अतः कर्त्तृत्वाभिमानाभावज्ञानिनां कृतमकृतम् एव इत्यर्थः ॥ २० ॥

ननु ज्ञानी चेत् निर्वासनस्तर्हि केन प्रयुक्तः कर्म करोति इत्याशङ्क्याह निर्वासन इति । निर्वासनः अत एव निरालम्बः

क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत्॥ २१॥

असंसारस्य तु क्वापि न हर्षो न विषादता।
स शीतलमना नित्यं विदेह इव राजते॥ २२॥

कुत्रापि न जिहासास्ति नाशो वापि न कुत्रचित्।
आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः॥२३॥

प्रकृत्या शून्यचित्तस्य कुर्वतोऽस्य यदृच्छया।
प्राकृतस्येव धीरस्य न मानो नावमानता॥२४॥

कर्तव्यानुसन्धानरहितः, अत एव स्वच्छन्दः रागद्वेषानधीनः। अतो मुक्तबन्धनः बन्धहेतुत्वज्ञानशून्यः ज्ञानी, संस्कारवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन्, शुष्कपर्णवत् विचेष्टते॥ २१॥

संसारहर्षादिशून्यत्वात् सर्वदा सन्तुष्ट एवेत्याह असंसारस्येति। न विद्यते संसारस्य हेतुः सङ्कल्पो यस्य तस्य असंसारस्य हर्षादिका ऊर्मयो न जायन्ते, अतएव ऊर्मिरहितत्वात् नित्यं शीतलमना विदेहमुक्त इव राजते "षडूर्मिरहितः शिवः" इति श्रुतेः॥ २२॥

कुत्रापि इति। आत्मारामस्य, अतएव धीरस्य निश्चल-चित्तस्य, अतएव शीतलः अच्छतरः निर्मलतरः आत्मा मनो यस्य तस्य शीतलाच्छतरात्मनः ज्ञानिनः कुत्रापि जिहासा त्यागेच्छा नास्ति, उपादित्सापि नास्ति, रागद्वेषाभावात् नाशोऽपि अनर्थोऽपि कुत्रचित् न अस्ति, अनर्थहेतोरज्ञान-स्याभावादित्यर्थः॥ २३॥

प्रकृत्या इति। प्रकृत्या स्वभावेन, शून्यं विकाररहितं चित्तं यस्य तस्य धीरस्य आत्मविज्ञस्य प्राकृतस्येव अज्ञानिन

कृतं देहेन कर्मेदं न मया शुद्धरूपिणा ।
इति चिन्तानुरोधी यः कुर्वन्नपि करोति न ॥२५॥
अतद्वादीव कुरुते न भवेदपि बालिशः ।
जीवन्मुक्तः सुखी श्रीमान् संसरन्नपि शोभते ॥२६॥
नानाविचारसुश्रान्तो धीरो विश्रान्तिमागतः ।
न कल्पते न जानाति न शृणोति न पश्यति॥२७
असमाधेरविक्षेपान्न मुमुक्षुर्न चेतरः ।

इव, यदृच्छया प्रारब्धवशात्, कुर्वतोऽस्य विदुषः समानापमानानुसन्धानं नास्ति इत्यर्थः ॥ २४ ॥

कृतं देहेन इति । इति चिन्तामनुरोध्यते निरन्तरं श्रयति यः स कुर्वन्नपि न करोति, कर्तृत्वाभिमानाभावादित्यर्थः ॥२५॥

अतद्वादीव इति । जीवन्मुक्तः अतद्वादीव अहमिदं करिष्यामि इति अवदन्नेव कार्यं कुरुते, प्रारब्धवशादवदन् अपि बालिशो मूर्खो न भवेत् अन्तर्ज्ञानित्वात्, अतएव संसरन्नपि संसारव्यवहारं कुर्वन्नपि अन्तः सुखी अतएव श्रीमान् प्रसन्नतया शोभावान्, अतएव शोभते दीप्यते स्वप्रकाश इत्यर्थः ॥६॥

नाना इति । नानाविचारात् द्वैतविचारात्, सुश्रान्तः इव निवृत्तो यतो धीरो ज्ञानी, अतएव आत्मन्येव विश्रान्तिमागतः, अतएव न कल्पते, सङ्कल्पादिकं मनोव्यापारं न करोति न जानाति बुद्धिव्यापारं न करोति, शब्दं न शृणोति, रूपं न पश्यति, इन्द्रियमात्रव्यापारं न करोमि कर्तृत्वाभिमानाभावात् इत्यर्थः ॥ २७ ॥

असमाधेः इति । ज्ञानी मुमुक्षुः न भवति, असमाधेः

निश्चित्य कल्पितं पश्यन् ब्रह्मैवास्ते महाशयः २८
यस्यान्तः स्यादहङ्कारो न करोति करोति सः।
निरहङ्कारधीरेण न किञ्चिदकृतं कृतम्॥ २९॥
नोद्विग्नं न च सन्तुष्टमकर्तृ स्पन्दवर्जितम्।
निराशं गतसन्देहं चित्तं मुक्तस्य राजते॥ ३०॥
निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्त्तते।

समाधेरकरणात् तथा इतरो बद्धो न भवति, अविक्षेपात् द्वैतभ्रमाभावात् इत्यर्थः। कोऽसावस्तीति ज्ञानीत्याशङ्क्याह निश्चित्येति। इदं सर्वं कल्पितम् इति पूर्वमेव निश्चित्य, पश्चात् बाधितानुवृत्त्या पश्यन् अपि महाशयः निर्विकारचित्तः, अतएव ब्रह्मैवास्ते॥ २८॥

ननु संसारं पश्यन्नेव कथं ब्रह्मेत्याशङ्क्य अहङ्काराभावात् इत्याह यस्येति। यस्यान्तःकरणे अहङ्काराध्यासः स्यात्। सः लोकदृष्ट्या न कुर्वन्नपि सङ्कल्पादिकं करोति कर्तृत्वाध्यासात्। निरहङ्कारेण अतएव धीरेण कर्तृत्वाध्यासरहितेन, यद्यपि लोकदृष्ट्या अकृतं, तथापि स्वदृष्ट्या न किञ्चित् अपि कृतं कर्तृत्वाध्यासाभावादित्यर्थः। "यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते" इति स्मृतेः॥ २९॥

मुक्तचित्तं वर्णयति द्वाभ्यां नोद्विग्नम् इति। मुक्तस्य चित्तं राजते केवलप्रकाशरूपमेव यतो नोद्विग्नम् उद्वेगहेतोर्द्वैतस्याभावात्। न च सन्तुष्टं सन्तोषहेतोरनुरागाभावात्। तथा अकर्तृ स्पन्दवर्जितं सङ्कल्पविकल्पशून्यमत एव निराशम्, गतःसन्देहो यस्मात् तत् गतसन्देहं सन्देहहेतोरज्ञानस्य नष्टत्वात् इत्यर्थः॥ ३०॥

निर्निमित्तमिदं किन्तु निर्ध्यायति विचेष्टते ॥३१॥
तत्त्वं यथार्थमाकर्ण्य मन्दः प्राप्नोति मूढताम् ।
अथवायाति सङ्कोचममूढः कोऽपि मूढवत् ॥३२॥
एकाग्रता निरोधो वा मूढैरभ्यस्यते भृशम् ।
धीराः कृत्यं न पश्यन्ति सुप्तवत् स्वपदे स्थिताः ३३

निर्ध्यातुम् इति । यस्य ज्ञानिनः चित्तं निर्ध्यातुं निःक्रियत्वेन स्थातुं चेष्टितुं चेष्टां सङ्कल्पादिरूपां कर्त्तुं वापि न प्रवर्त्तते न सङ्कल्पयति । किन्तु इदं ज्ञानिनश्चित्तं निर्निमित्तं सङ्कल्परहितमेव सत् निर्ध्यायति निश्चलं स्वरूपे तिष्ठति चेष्टति । तथा विचेष्टते विविधां चेष्टां करोति इत्यर्थः ॥ ३१ ॥

ज्ञान्यज्ञानिनो निर्विशेषं वदन्नेव ज्ञानिनो विरलत्वमाह तत्त्वम् इति । मन्दः अज्ञानी यथार्थं तत्त्वं तत्त्वम्पदार्थभेदम्, श्रुतेः आकर्ण्य असम्भावनाविपरीतभावनाभ्यां मूढताम् अविवेकं प्राप्नोति । अथवा शास्त्रार्थसाक्षात्काराय सङ्कोचं चित्तसमाधिम् आयाति कोऽपि सहस्रेष्वेकः अतः असंमूढोऽपि बाह्यगत्या मूढवत् बहिर्व्यवहारकर्त्ता भवति ॥ ३२ ॥

"अथवायाति सङ्कोचम्" इत्यनेनोक्तौ एकाग्रतानिरोधौ दूषयति एकाग्रता इति । एकाग्रता एकमेव अग्रं ध्येयं यस्य तदेकाग्रम् । एकाग्रस्य भाव एकाग्रता वा एकाग्रता एकवस्तुनिष्ठचित्तता । अथ वा निरोधः चित्तविलयो मूढैः अनुत्पन्नात्मसाक्षात्कारैः विपरीतभावनानिवृत्तये भृशम् अत्यर्थम्, अभ्यस्यते सुप्तवत् सुषुप्तवत् देहाद्यभीराहित्येन स्वपदे स्वरूपे स्थिता धीरा विज्ञानिनस्तु प्राप्तुं किमपि कृत्यं न पश्यन्ति

अप्रयत्नात् प्रयत्नाद्वा मूढो नाप्नोति निर्वृतिम् ।
तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ॥३४॥
शुद्धं बुद्धं प्रियं पूर्णं निष्प्रपञ्चं निरामयम् ।
आत्मानं तं न जानन्ति तत्राभ्यासपरा जनाः ॥३५॥
नाप्नोति कर्मणा मोक्षं विमूढोऽभ्यासरूपिणा ।
धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्यविक्रियः ॥३६॥

अद्वैतानन्दात्मसाक्षात्कारेणैव आनन्दादिभ्रमस्य दुरापास्तत्वादित्यर्थः ॥ ३३ ॥

निरोधस्य अकिञ्चित्करतामाह अप्रयत्नात् इति । मूढः पुरुषः मूढो ब्रह्मात्मैकनिश्चयशून्यः, अप्रयत्नात् चित्तनिरोधात् प्रयत्नात् कर्मानुष्ठानात् वा निर्वृतिं परमं सुखं न प्राप्नोति । आनन्दहेतोरात्मानन्दानुभवाभावादित्यर्थः । प्राज्ञः तु समाधिं वाक्कर्म्म वापि अकुर्वन् । तत्त्वनिश्चयमात्रेण ज्ञातार्थो भवति दुःखहेतोरज्ञानस्य ज्ञानेन दग्धत्वादित्यर्थः ॥ ३४ ॥

ननु मूढस्य योगाभ्यासादात्मानुभवो भविष्यतीत्याशङ्क्य न इत्याह शुद्धम् इति । तत्र जगति अभ्यासपरा जनाः अज्ञानिनः आत्मानं तं न जानन्ति । कीदृशं शुद्धं मायामलातीतम् अतएव बुद्धं स्वप्रकाशम् । प्रियं सुखरूपं पूर्णं यतो निष्प्रपञ्चम् अतएव निरामयं दुःखसम्बन्धरहितमित्यर्थः ॥ ३५ ॥

इदमेव विवृणोति नाप्नोति इति । विमूढः अनात्मज्ञः, अभ्यासरूपिणा योगाभ्यासात्मकेन कर्मणा मोक्षं नाप्नोति । "कर्मणा न प्रजया न धनेन" इति श्रुतेः । धन्यो भाग्यवान् विरक्तो विज्ञानमात्रेण अविक्रियो निरस्ताविद्याज्ञानकर्मा, अतएव मुक्तस्तिष्ठति ॥ ३६ ॥

मूढ़ो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति ।
अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक् ॥३७॥
निराधारा ग्रहव्यग्रा: मूढ़ा: संसारपोषका: ।
एतस्यानर्थमूलस्य मूलच्छेद: कृतो बुधै: ॥ ३८ ॥
न शान्तिं लभते मूढो यत: शमितुमिच्छति ।
धीरस्तत्त्वं विनिश्चित्य सर्वदा शान्तमानस: ॥३९॥
क्वात्मनो दर्शनं तस्य यद्दृष्टमवलम्बते ।

मुमुक्षुरपि मूढ़ो ब्रह्म नाप्नोतीत्याह मूढ़ इति । मूढ़: अज्ञानी, यत: चित्तनिरोधात् एव ब्रह्म भवितुमिच्छति । ततो ब्रह्म नाप्नोति, हि निश्चितं धीरो ज्ञानी मोक्षम् अनिच्छन्नपि परब्रह्मस्वरूपभाक् व्यवधानस्य निवृत्तत्वादित्यर्थ: ॥३७॥

एतदेव स्पष्टयति निराधारा इति । मूढ़ा: अज्ञानिन:, निराधारा ग्रहव्यग्रा: केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामीति निष्कारणदुराग्रहव्यग्रा: प्रत्युत संसारपोषका: संसारनिवर्तकज्ञानपराङ्मुखत्वात् । बुधै: ज्ञानिभि: अनर्थमूलस्य एतस्य संसारस्य मूलच्छेद: कृत: संसारमूलभूताज्ञानस्य ज्ञानेन निवृत्तत्वादित्यर्थ: । ३८ ॥

किञ्च न शान्तिम् इति । मूढ़ अज्ञानी यत: निरोधादे:, शमितुमिच्छति । न तत: शान्तिं लभते, धीरो विवेकी तत्त्वं विनिश्चित्य शमितुमनिच्छन्नपि स्वभावात् एव सर्वदा शान्तमानसो भवति । चेतोविकारहेतोरज्ञानस्य निवृत्तत्वादित्यर्थ: ॥ ३९ ॥

किञ्च क्वात्मन: इति । यद्दृष्टं यस्य दृष्टं ज्ञातम् अवलम्बते

धीरास्तं तं न पश्यन्ति पश्यन्त्यात्मानमव्ययम् ४०

क्व निरोधो विमूढस्य यो निर्बन्धं करोति वै।
स्वारामस्यैव धीरस्य सर्वदाऽसावकृत्रिमः ॥ ४१ ॥

भावस्य भावकः कश्चिन्न किञ्चिद्भावकोऽपरः।
उभयाभावकः कश्चिदेवमेव निराकुलः ॥ ४२ ॥

शुद्धमद्वयमात्मानं भावयन्ति कुबुद्धयः।

दृश्यं विषयीकरोति। तस्यात्मनो दर्शनं क्व, न क्वापि सम्भवः। धीराः ज्ञानिनः तं तं तिमिरपटीपादिकं दृश्यपदार्थं न पश्यन्ति, किन्तु चिद्रूपम् आत्मानं पश्यन्ति ॥ ४० ॥

क्व इति। यः अज्ञानी मुग्धश्चित्तनिरोधे निर्बन्धं करोति। तस्य विमूढस्य क्व चित्तनिरोधः, न क्वापि, अज्ञानिनां समाध्युपरमे पुनश्चित्तप्रसारात्, स्वारामस्यैव आत्मारामस्य अतएव निश्चलचित्तस्य सर्वदाऽसौ चित्तनिरोधः अकृत्रिमः स्वाभाविकः सर्वदा आत्मानुभवशालित्वात् ॥ ४१ ॥

भावस्य इति। कश्चित् तार्किकादिः भावस्य भावकः भावरूपं परमार्थतः सन् प्रपञ्च इति भावयति मन्यते इति भावस्य भावकः, अपरः शून्यवादी बौद्धः न किञ्चिदस्तीति विभावयतीति न किञ्चिद्भावकः। कश्चित् सहस्रेषु एव कश्चिदात्मानुभवशाली, उभयाभावकः सन् एव उभयाभावनेन एव निराकुलः स्वस्थचित्त आस्ते इत्यर्थः ॥ ४२ ॥

"न किञ्चिदपि चिन्तयेत्" इति भगवद्वचनम्, चिदात्मानमभिप्रेत्याह शुद्धम् इति। कुबुद्धयः मूढबुद्धय एव शुद्धं निर्मलम् अद्वयं द्वैतवर्जितम्, आत्मानम् अतनमीशं व्यापकं भावयन्ति

न तु जानन्ति संमोहाद्यावज्जीवमनिर्वृताः ॥४३॥
मुमुक्षोर्बुद्धिरालम्बमन्तरेण न विद्यते ।
निरालम्बैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ॥४४॥
विषयद्वीपिनो वीक्ष्य चकिताः शरणार्थिनः ।
विशन्ति झटिति क्रोड़ं निरोधैकाग्रसिद्धये ॥४५॥
निर्वासनं हरिं दृष्ट्वा तूष्णीं विषयदन्तिनः ।

चिन्तयन्ति, न तु जानन्ति साक्षात्कुर्वन्ति कुतः, सम्मोहात् निर्मलत्वस्य कल्पितमलसापेक्षत्वात् अद्वयस्य कल्पितद्वैतसापेक्षत्वात् आत्मत्वस्य च कल्पितानात्मसापेक्षत्वात् सापेक्षरूपचिन्तनेन तु मोहानिवृत्तेः यतो न जानन्ति, अतएव यावज्जीवमनिर्वृताः परमसन्तोषरहिताः सन्तोषस्य ज्ञानैकलभ्यत्वादित्यर्थः ॥ ४३ ॥

इदमेव विशदयति मुमुक्षोः इति। मुमुक्षोः अनधिगतात्मसाक्षात्कारस्य बुद्धिः, सविशेषालम्बनम् अन्तरेण न विद्यते साक्षात्काराभावात् मुक्तस्य जीवन्मुक्तस्य, अतएव मुक्तावपि निष्कामा बुद्धिः, सर्वदा निरालम्बैव निर्विशेषात्मानुभवरूपैव, सविशेषादिपरित्याग एवात्मानुभवः ॥ ४४ ॥

निरोधोऽपि विषयस्फूर्त्तिचकितैरेवानुष्ठीयते न तु विशेषज्ञैरित्याह विषय इति। विषयद्वीपिनो विषयव्याघ्रान् वीक्ष्य "शार्दूलद्वीपिनौ व्याघ्रे" इत्यमरः भीताः शरणार्थिनः त्राणरक्षणार्थिनो, मूढ़ा एव निरोधसिद्धये एकाग्रवृत्तिसिद्ध्यै वा, झटिति शीघ्रं, क्रोड़ं कन्दरान्तःप्रदेशं, विशन्ति न तु ज्ञानिन इत्यर्थः ॥ ४५ ॥

वासनात्याग एव विषयभयनिवृत्तिरित्याह निर्वासनमिति।

पलायन्ते न शक्तास्ते सेवन्ते कृतचाटवः ॥ ४६ ॥
न मुक्तिकारिकां धत्ते निःशङ्को युक्तमानसः ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखम् ॥ ४७
वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः ।
नैवाचारमनाचारमौदास्यं वा प्रपश्यति ॥ ४८ ॥
यदा यत् कर्तुमायाति तदा तत् कुरुते ऋजुः ।
शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत् ॥ ४९

निर्वासनो यः पुरुषस्तद्रूपं, हरिं सिंहं दृष्ट्वा विषयदन्तिनो न शक्ताः सन्तः तूष्णीं मौनं यथा स्यात्तथा पलायन्ते कृतचाटवः कृतप्रियवचना इव तं निर्वासनम् ईश्वराद्दृष्टाः अनुगामुकाः सेवन्त इत्यर्थः ॥ ४६ ॥

न मुक्तिकारिकामिति । निःशङ्को गतसंशयः अत एव युक्तमानसो निश्चलमानसः ज्ञानी मुक्तिकारिकां यमनियमादिक्रियामाग्रहात् न धत्ते किं तर्हि कर्तृत्वाध्यासरहितत्वात् यथासुखम् प्रारब्धमनतिक्रम्य, लोकदृष्ट्या ईक्षणादिक्रियां कुर्वन् आस्ते इत्यर्थः ॥ ४७ ॥

वस्त्विति । वस्तुनश्चिदात्मनः श्रवणमात्रेण ज्ञाता वा शुद्धबुद्धिः चलत्वाज्ञानसाक्षात्कारस्ततो निराकुलः आत्मरूपस्थः पुरुषः, आचारं क्रियानुष्ठानम् अनाचारम् अशुभं कर्म वा, औदास्यं नैष्कर्म्यम् उभयथापि ताटस्थ्यं वा एतत्त्रयमपि नैव प्रपश्यति आत्मरूपत्वादित्यर्थः । ४८ ।

यदेति । यदा यत् शुभं नैष्कर्म्यं वा अशुभं कर्म वा, कर्तुमायाति तत् लोकदृष्ट्या प्रारब्धवशात् कुरुते, ऋजुः

स्वातन्त्र्यात् सुखमाप्नोति स्वातन्त्र्याल्लभते परम् ।
स्वातन्त्र्यान्निर्वृतिं गच्छेत् स्वातन्त्र्यात् परमं पदम् ५०
अकर्तृत्वमभोक्तृत्वं स्वात्मनो मन्यते यदा ।
तदा क्षीणा भवन्त्येव समस्ताश्चित्तवृत्तयः ॥ ५१ ॥
उच्छृङ्खलाप्यकृतिका स्थितिर्धीरस्य राजते ।
न तु सस्पृहचित्तस्य शान्तिर्मूढस्य कृत्रिमा ॥५२॥
विलसन्ति महाभोगैर्विशन्ति गिरिगह्वरान् ।

भावरहितः, हि यतः कारणात् तस्य चेष्टा बालवत् प्रारब्ध-मात्रायत्ता न रागद्वेषाधीना ॥ ४९ ॥

स्वातन्त्र्यात् इति । स्वातन्त्र्यात् रागद्वेषानधीनत्वात् सुखं मनःप्रसादम्, आप्नोति यतः स्वातन्त्र्यात् परं ज्ञानं प्राप्नोति । तथा स्वातन्त्र्यात् निर्वृतिं नित्यसुखं गच्छेत् प्राप्नुयात् । अत एव स्वातन्त्र्यात् परमं पदं स्वस्वरूपविश्रान्तिं गच्छेत् ॥ ५० ॥

अकर्तृत्वम् इति । यदा स्वात्मनः अकर्तृत्वम् अभोक्तृत्वं मन्यते, तदा समस्ताः चित्तवृत्तयः क्षीणा भवन्त्येव, अमुकं कर्म अहं करिष्यामि, अमुकं मे भोग्यं भवतु इत्यादि चित्त-वृत्त्यनुदये तदन्यानामन्यासामपि चित्तवृत्तीनामनुदया-दित्यर्थः ॥ ५१ ॥

उच्छृङ्खला इति । धीरस्य वीतस्पृहस्य अकृतिका अकृ-त्रिमा, उच्छृङ्खलापि शान्तिरहितापि स्थितिः शोभते सस्पृह-चित्तस्य मूढस्य तु कृत्रिमा न शोभते इत्यर्थः ॥ ५२ ॥

निरस्तकल्पनानां ज्ञानिनां तु भोगतद्राहित्योरप्यनायास इत्याह विलसन्ति इति । निरस्तकल्पना धीराः ज्ञानिनः

निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ॥५३॥
श्रोत्रियं देवतां तीर्थमङ्गनां भूपतिं प्रियम् ।
दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना ॥५४॥
भृत्यैः पुत्रैः कलत्रैश्च दौहित्रैश्चापि गोत्रजैः ।
विहस्य धिक्कृतो योगी न याति विकृतिं मनाक् ॥५५॥
सन्तुष्टोऽपि न सन्तुष्टः खिन्नोऽपि न च खिद्यते ।
तस्याश्चर्य्यदशां तां तां तादृशा एव जानते ॥५६॥
कर्त्तव्यतैव संसारो न तां पश्यन्ति सूरयः ।

कदाचित्प्रारब्धवशात् महाभोगैः विलसन्ति क्रीडन्ति कदाचित्प्रारब्धवशात्, गिरिगह्वरान् पर्वतवनानि विशन्ति धीरमाः, अबद्धाः वासनारहिताः यतो मुक्तबुद्धयः, कर्तृत्वाध्यासवर्जितबुद्धय इत्यर्थः ॥ ५३ ॥

श्रोत्रियम् इति । धीरस्य ज्ञानिनः श्रोत्रियदेवतातीर्थपूजने सति हृदि कापि वासना धर्मार्थकामवासना न जायते, तथा अङ्गनां भूपतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि काम्यपदार्थवासना न जायते, सर्वत्र समबुद्धित्वादित्यर्थः ॥ ५४ ॥

भृत्यैः इति । भृत्यादिभिर्विहस्य उपहस्य धिक्कृतः तिरस्कृतो योगी मनाक् किञ्चिदपि विकृतिं चित्तक्षोभं न याति, रागद्वेषहेतोर्मोहस्याभावात् इत्यर्थः ॥ ५५ ॥

सन्तुष्टः इति । लोकदृष्ट्या सन्तोषादियुक्तोऽपि वस्तुतः तद्रहितः, तस्य ज्ञानिनः तां ताम् आश्चर्यदशां तादृशा एव ज्ञानिनः जानते ॥ ५६ ॥

कर्तव्यतैव इति, कर्तव्यतैव ममेदं कर्तव्यमिति कार्य-

शून्याकारा निराकारा निर्विकारा निरामयाः॥५७॥
अकुर्वन्नपि संक्षोभात् व्यग्रः सर्वत्र मूढधीः।
कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः॥५८॥
सुखमास्ते सुखं शेते सुखमायाति याति च।
सुखं वक्ति सुखं भुङ्क्ते व्यवहारेऽपि शान्तधीः॥५९॥
स्वभावाद्यस्य नैवार्त्तिर्लोकवत् व्यवहारिणः।
महाह्रद इवाक्षोभ्यो गतक्लेशः सुशोभते॥६०॥

सङ्कल्प एव, संसारः तद्धेतुत्वात् तदयो ज्ञानिनः तं कर्तुं अतां न पश्यन्ति न सङ्कल्पयन्ति सङ्कल्परहितत्वात्, कीदृशाः सन्तः शून्ये सर्वपदार्थरहिते तथा वर्त्तमानघटाद्याकारे व्याकृते आकारः आभासो नियतो येषां ते शून्याकाराः घटाद्याकाराः निराकाराः अतएव निर्विकाराः समाः आत्मदर्शिनः, अतएव निरामयाः सङ्कल्पोपद्रवरहिता इत्यर्थः॥५७॥

अकुर्वन्नपि इति। अकुर्वन्नपि मूढधीः सर्वत्र शून्याकारनिराकारेषु संक्षोभात् सङ्कल्पात् व्यग्रः भवति। लोकदृष्ट्या कृत्यानि कुर्वन्नपि कुशलो विद्वान् हि निश्चितं निराकुलो निश्चलचित्तः आत्मारामत्वात् इत्यर्थः॥५८॥

सुखम् इति। प्रारब्धवशात् व्यवहारे जायमाने शान्तधीः आत्मनिष्ठबुद्धिर्विद्वान् आत्मसुखम् अनतिक्रम्यैव आस्ते उपविशति शेते आगच्छति गच्छति वक्ति भुङ्क्ते सर्वेन्द्रियव्यापारं करोतीत्यर्थः॥५९॥

ननु ज्ञानिनोऽपि व्यवहारेषु कथं न खेद इत्यत आह स्वभावात् इति। व्यवहारिणः अपि यस्य ज्ञानिनो लोकवत्

निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते ।
प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी ॥ ६१ ॥
परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते ।
देहे विगलिताशस्य क्व रागः क्व विरागता ॥६२॥
भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा ।
भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी ॥६३॥

प्राकृतजनवत् आर्त्तिः खेदो न जायते कुतः स्वभावात् साक्षात् ज्ञातानन्दस्य स्वभावादात्मसामर्थ्यादित्यर्थः । न गतक्षोभो ज्ञानी महाह्रद इव अक्षोभ्यो निर्विकारः सुशोभते ॥ ६० ॥

निवृत्तिः इति । लोकदृष्ट्या प्रतीयमानापि मूढस्य बाह्येन्द्रियव्यापाराणां निवृत्तिः, प्रवृत्तिरूपैव जायते अहङ्कारादीनामनिवृत्तत्वात्, धीरस्य ज्ञानिनः लोकदृष्ट्या प्रारब्धवशात् प्रतीयमानापि प्रवृत्तिरपि निवृत्तिफलभागिनी मुक्तिपर्य्यवसायिनी स्यात् । अहं करोमीत्यभिमानाभावादित्यर्थः ॥ ६१

परिग्रहेषु इति । मूढस्य देहाभिमानिनस्तत्सम्बन्धितया परिगृहीतेषु धनवेश्मादिषु प्रायो बाहुल्येन वैराग्यं दृश्यते, देहे विगलिताशस्य क्व तत्सम्बन्धिनि पुत्रगृहादौ रागः स्यात्, क्व च तत्त्यागादौ विरागता स्यात्, रागविरागयोरभावे तत्सम्बन्धिषु रागविरागयोर्बन्धकत्वात् एवेत्यर्थः ॥ ६२ ॥

भावना इति । मूढस्य दृष्टिः सर्वदा भावनायाम् अभावनायां वा सक्ता, अहं भावनां करोमि यद्वाहमभावनां करोमीत्यहङ्कारात् स्वस्थस्य आत्मनिष्ठस्य तु सा दृष्टिः, भाव्यभावनया दृश्यचिन्तया उपलक्षितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैव स्यात्, अहं करोमीत्यभिमानाभावादित्यर्थः ॥६३॥

सर्वारम्भेषु निष्कामो यश्चरेद्बालवत् मुनिः ।
न लेपस्तस्य शुद्धस्य क्रियमाणेऽपि कर्मणि ॥६४॥
स एव धन्य आत्मज्ञः सर्वभावेषु यः समः ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निस्तर्षमानसः ६५
क्व संसारः क्व चाभासः क्व साध्यं क्व च साधनम् ।
आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा ॥६६॥
स जयत्यर्थसन्न्यासी पूर्णस्वरसविग्रहः ।
अकृत्रिमोऽनवच्छिन्ने समाधिर्यस्य वर्त्तते ॥६७॥

ननु बाह्यदृश्यभावेन क्रियमाणेऽपि तस्य दृष्टिः कथं दृश्यानासक्तिरित्याशङ्क्य निष्कामत्वादित्याह सर्वारम्भेष्विति । यो बालवत् निष्कामः सन् प्राक्तनवशात् सर्वारम्भेषु चरति प्रवर्त्तते, तस्य शुद्धस्य अहङ्कारमलवर्जितस्य कर्मणि क्रियमाणे लेपो न कर्त्तृता स्यात् अहङ्काराभावादित्यर्थः ॥ ६४ ॥

एवंविधोऽतिधन्य इत्याह स एव इति । स एव आत्मज्ञः धन्य एव नान्यः यः सर्वभावेषु समः आत्मबुद्धिः अतएव निस्तर्षमानसः वितृष्णचित्तो भवति, किं कुर्वन् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् अपि ॥ ६५ ॥

तस्यैव धन्यत्वे युक्तिमाह क्व इति । धीरस्य ज्ञानिनः अत एव सर्वदा विकल्परहितस्य संसारः प्रपञ्चः क्व, अतएव तत्प्रतिभासश्च क्व, अतएव साध्यं स्वर्गादिकं क्व, अतएव साधनं यागादिकं क्व न क्वापीत्यर्थः ॥ ६६ ॥

स जयति इति । सः अर्थसन्न्यासी दृष्टादृष्टप्रयोजनशून्यः अतः पूर्णस्वरसः पूर्णस्वभावो विग्रहः स्वरूपं यस्य स पूर्णस्वरस-

बहुनात्र किमुक्तेन ज्ञाततत्त्वो महाशयः ।
भोगमोक्षनिराकाङ्क्षी सदा सर्वत्र नीरसः ॥६८॥
महदादि जगद्द्वैतं नाममात्रविजृम्भितम् ।
विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते ॥ ६९ ॥
भ्रमभूतमिदं सर्वं किञ्चिन्नास्तीति निश्चयी ।
अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति ॥७०॥

विपश्चो जयति सर्वोत्कर्षेण वर्त्तते, सः कः? यस्य अकृत्रिमः स्वाभाविकः अनवच्छिन्ने पूर्णस्वरूपे समाधिः वर्त्तते स जयतीत्यर्थः ॥ ६७ ॥

ज्ञाततत्त्वस्य तु सर्वत्र निराकाङ्क्षत्वमेव मुख्यं लक्षणमित्याह बहुना इति । अत्र ज्ञानिनि बहुना उक्तेन कथनेन किं प्रयोजनं, यतो ज्ञाततत्त्वो महाशयः । महाशयत्वं विवृणोति भोगमोक्षनिराकाङ्क्षी इति । भोगमोक्षयोः फलयोः निराकाङ्क्षी अतएव सदा सर्वत्र भोगमोक्षसाधनेषु नीरसः निरनुरागः ॥६८॥

किं च महदादि इति । महदादि महदहङ्कारपञ्चतन्मात्रा पञ्चमहाभूतभौतिकजगद्रूपं द्वैतं नाममात्रेणैव विजृम्भितं विभिन्नमिव भातं, न तु वास्तवं "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः । अतएव तत्र कल्पनां विहाय स्थितस्य अतएव शुद्धबोधस्य अप्रकाशविकाशकस्वरूपस्य किं कृत्यमवशिष्यते, सर्वदा सच्चिदानन्दाधिगमेनैव कृतकृत्यत्वादिति भावः ॥ ६९ ॥

ननु तथापि अनर्थशान्त्यर्थं प्रयत्नः कर्त्तव्य इत्याह भ्रमभूतम् इति । अधिष्ठानसाक्षात्कारे सति इदं सर्वं भ्रमभूतं

शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः ।
क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोऽपि वा ७१

स्फुरतोऽनन्तरूपेण प्रकृतिं च न पश्यतः ।
क्व बन्धः क्व च वा मोक्षः क्व हर्षः क्व विषादिता ७२

बुद्धिपर्य्यन्तसंसारे मायामात्रं विवर्त्तते ।
निर्ममो निरहङ्कारो निष्कामः शोभते बुधः॥७३॥

अक्षयं गतसन्तापमात्मानं पश्यतो मुनेः ।

भ्रमेणैव कल्पितम्, अतएव इदं किञ्चित् किमपि वास्तवं नास्तीति निश्चयी अनन्तस्फुरणः चिन्मात्रप्रतिभासवान् अतएव शुद्धः स्वरूपसाक्षात्कारेण बाधिताध्यस्तमलत्वात् स्वभावेनैव शान्तो न तु शान्त्यर्थं शमादिनियममपेक्ष्यमित्यर्थः ॥ ७० ॥

शुद्ध इति। शुद्धस्फुरणरूपस्य स्वप्रकाशचिद्रूपस्य अतएव दृश्यभावं दृश्यपदार्थम् अपश्यतः, क्व कुत्र कर्मणि विधिः, क्व केषु वा विषयेषु वैराग्यं, क्व केषु पदार्थेषु त्यागः, क्व केभ्यः पदार्थेभ्यः शमोऽपि वा कार्यः। दृश्यपदार्थस्यैवास्फुरणात् इत्यर्थः ॥ ७१ ॥

स्फुरत इति। चिद्रूपेणैव प्रकाशमानस्य बन्धादिकं नास्ति इत्यर्थः ॥ ७२ ॥

किञ्च बुद्धि इति। बुद्धिः आत्मज्ञानमेव पर्य्यन्तो नाशो यस्य तस्मिन् संसारे मायामात्रं मायाप्रवर्तितं चैतन्यं विवर्त्तते, अतात्त्विकं जगदाकारं प्राप्नोति अतो बुधो विद्वानतात्त्विके शरीरे निरहङ्कारः तत्सम्बन्धिनि कलत्रादौ निर्ममः, अतएव निष्कामः अतएव शोभते दीप्यते कामनाहतत्वात् ॥ ७३ ॥

क्व विद्या च क्व वा विश्वं क्व देहोऽहं ममेति वा॥७४
निरोधादीनि कर्माणि जहाति जडधीर्यदि।
मनोरथान् प्रलापांश्च कर्तुमाप्नोत्यतत्क्षणात्॥७५॥
मन्दः श्रुत्वापि तद्वस्तु न जहाति विमूढताम्।
निर्विकल्पो बहिर्यत्नादन्तर्विषयलालसः॥ ७६ ॥
ज्ञानाद्गलितकर्मा यो लोकदृष्ट्यापि कर्मकृत्।
नाप्नोत्यवसरं कर्तुं वक्तुमेव न किञ्चन॥ ७७ ॥

अक्षयम् इति। अक्षयम् अविनाशिनम्, अतएव सन्तापरहितम् आत्मानं पश्यतो मुनेः, क्व विद्या क्व शास्त्रादीत्यर्थः। क्व च वा विश्वं क्व च देहः अहं ममेति वा क्व, आत्मातिरिक्तस्य विद्याविद्यादेः स्फुरणादित्यर्थः॥ ७४॥

आत्मज्ञस्य द्वैतामर्षनिश्चितिरिक्तत्वमज्ञस्य तु चित्तनिरोधादीनि अपि कर्माणि कुम्भकयोगप्रायाणीत्याह निरोधादीनि इति। यदि जडधीः चित्तनिरोधादीनि जहाति, तर्हि अतत्क्षणात् क्षणादेव कथादारभ्य मनोरथान् प्रलापान् सर्वथा सर्वव्यापारान् कर्तुमाप्नोति प्रवर्त्तते। तथा च मूढस्य चित्तनिरोधादिकर्मविधिविस्तरमित्यर्थः॥ ७५॥

मूढस्य आत्मश्रवणमप्यनर्थकमित्याह मन्द इति। मन्दो मूर्खः तदात्मवस्तु श्रुत्वापि विमूढतां न जहाति, मलिनचित्तस्य श्रवणादपि ज्ञानानुदयात्। अतएव मूढः यत्नात् बहिर्दृष्ट्या निर्विकल्पो निर्व्यापारोऽपि अन्तर्मनसि विषये लालसोलुपो भवतीत्यर्थः॥ ७६॥

ज्ञानी तु लोकदृष्ट्या कर्म कुर्वाणोऽपि अकर्त्ता एव इत्याह

क्व तमः क्व प्रकाशो वा हानं क्व च न किञ्चन ।
निर्विकारस्य धीरस्य निरातङ्कस्य सर्वदा ॥ ७८ ॥
क्व धैर्य्यं क्व विवेकित्वं क्व निरातङ्कतापि वा ।
अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः ॥७९॥
न स्वर्गो नैव नरको जीवन्मुक्तिर्न चैव हि ।
बहुनात्र किमुक्तेन योगदृष्ट्या न किञ्चन ॥ ८० ॥
नैव प्रार्थयते लाभं नालाभेनानुशोचति ।

ज्ञानात् इति। यः ज्ञानात् गलितकर्मा गलितक्रियाध्यासः स लोकदृष्ट्या कर्मकृदपि किञ्चन कर्तुं वक्तुमेव अवसरं नाप्नोति, अहं कर्म करिष्यामीति वक्तुमपि अवसरं नाप्नोति। कर्मावसरस्तु दूरापास्त इति भावः ॥ ७७ ॥

विद्वांस्तु तमःप्रकाशादिकं न पश्यतीत्याह क्व इति। धीरस्य ज्ञानिनः, अत एव निर्विकारस्य निरस्तमोहादिविकारस्य तमः क्व, तमसोऽभावे च तद्विरुद्धः प्रकाशो वा क्व निरातङ्कस्य कालादिभयशून्यस्य हानं क्व च, न कुत्रेत्यर्थः। अनुरागादिशून्यत्वाच्च किञ्चन किमप्यादानादिकर्मापि क्व च न, न कुत्रापीत्यर्थः ॥ ७८ ॥

ज्ञानी तु अनिर्वाच्यस्वभाव इत्याह क्व धैर्य्यमिति। योगिनः ज्ञानिनः, अत एव निःस्वभावस्य अत एव अनिर्वाच्यस्वभावस्य धैर्य्यं क्व, विवेकित्वं च क्व, निरातङ्कता निर्भयता अपि क्व इत्यर्थः ॥ ७९ ॥

ज्ञानिनः तत्त्वदृष्ट्या तु स्वर्गनरकमोक्षादिकं किञ्चिदपि नास्तीत्याह न स्वर्गः इति। सुगमः श्लोकः ॥ ८० ॥

धीरस्य शीतलं चित्तममृतेनैव पूरितम्॥ ८१॥
न शान्तं स्तौति निष्कामो न दुष्टमपि निन्दति।
समदुःखसुखस्तृप्तः किञ्चित् कृत्यं न पश्यति॥ ८२॥
धीरो न द्वेष्टि संसारमात्मानं न दिदृक्षति।
हर्षामर्षविनिर्मुक्तो न मृतो न च जीवति॥ ८३॥
निःस्नेहः पुत्रदारादौ निष्कामो विषयेषु च।
निश्चिन्तः स्वशरीरेऽपि निराशः शोभते बुधः॥ ८४॥

ज्ञानिनश्चित्तं तु प्रार्थनानुतापादिविकाररहितत्वादमृतेनैव परमानन्देनैव पूरितमित्याह नैव इति। लाभं न प्रार्थयते, अलाभेन सुवर्णाद्यलाभेन न अनुशोचति। अत एव धीरस्य चित्तममृतेनैव परमानन्देनैव पूरितं सत् शीतलमाध्यात्मिकादितापरहितमित्यर्थः॥ ८१॥

उक्तप्रायमेवार्थं पुनःपुनर्भङ्गिविशेषेण वर्णयति। ज्ञानदशायाः सर्वोत्कृष्टत्वख्यापनाय न शान्तमिति। निष्कामो विद्याकामकर्मक्षीणो ज्ञानी शान्तं शान्त्यादिगुणवत्त्वगुणयुक्तं न स्तौति नापि दुष्टं निन्दति, ततः सन् समदुःखसुखी भवति, निष्कामत्वात् किञ्चित्कृत्यं न पश्यति॥ ८२॥

धीर इति। धीरो ज्ञानी संसारं न द्वेष्टि, संसारादर्शित्वात् बाधितानुसन्धानाद्वा, तथा आत्मानं न दिदृक्षति, सदात्मसाक्षात्कारत्वात्। अत एव हर्षामर्षविनिर्मुक्तः तथा जीवनमरणादिरहितः सदैकरूपत्वादित्यर्थः॥ ८३॥

निःस्नेह इति। निराशो बुधः शोभते दीप्यते, कीदृशः

तुष्टिः सर्वत्र धीरस्य यथापतितवर्तिनः ।
स्वच्छन्दं चरतो देशान्यत्रास्तमितशायिनः ॥ ८५ ॥
पततूदेतु वा देहो नास्य चिन्ता महात्मनः ।
स्वभावभूमिविश्रान्तिविस्मृताशेषसंसृतेः ॥ ८६ ॥
अकिंचनः कामचारो निर्द्वन्द्वश्छिन्नसंशयः ।
असक्तः सर्वभावेषु केवलो रमते बुधः ॥ ८७ ॥
निर्ममः शोभते धीरः समलोष्टाश्मकाञ्चनः ।

पुत्रदारादौ निःस्नेहः प्रीतिरहितः, विषयेषु निष्कामः भोगेच्छारहितः, स्वशरीरेऽपि भोजनादिचिन्तारहितः ॥ ८४ ॥

तुष्टिः इति । धीरस्य ज्ञानिनः, यथापतितेन यथाप्राप्तेन वर्तते तिष्ठति तस्य यथापतितवर्तिनः, सर्वत्र प्रारब्धप्राप्ते सदसति च तुष्टिः आत्मतोष एव भवति तथा, स्वच्छन्दम् अनपेक्षितं प्रारब्धवशादागतान् देशान् विचरतः यत्र वने वा नगरे वा सूर्योऽस्तमितः तत्रैव शायिनः शयनं कुर्वत एवैतस्य ॥ ८५ ॥

पततु इति । देहः पततु म्रियतां वा अथवा उदेतु जीवतु वा, उभयथापि अस्य ज्ञानिनः चिन्ता न भवति, कीदृशस्य स्वभावो नाम निजात्मस्वरूपं स एव भूमिः तत्र विश्रान्त्या विस्मृत-समस्तसंसारस्य ॥ ८६ ॥

अकिंचनः इति । केवलो निर्विकारो बुधो रमते, कीदृशः अकिंचनः नास्ति किंचित् परिग्रहोऽतं यस्य सः अकिंचनः । अत एव कामचारः विधिनिषेधाद्यविषयः स्वच्छन्दचारी, अत एव निर्द्वन्द्वः सुखदुःखादिशून्यः छिन्नसंशयः द्वैतसंशयशून्यः सर्वेषु भावेषु विषयेषु असक्तः आसक्तिशून्य एवैतस्य ॥ ८७ ॥

सुभिन्नहृदयग्रन्थिर्विनिर्धूतरजस्तमः ॥ ८८ ॥
सर्वत्रानवधानस्य न किंचिद्वासना हृदि ।
मुक्तात्मनो वितृप्तस्य तुलना केन जायते ॥ ८९ ॥
जानन्नपि न जानाति पश्यन्नपि न पश्यति ।
ब्रुवन्नपि न च ब्रूते कोऽन्यो निर्वासनादृते ॥ ९० ॥
भिक्षुर्वा भूपतिर्वापि यो निष्कामः स शोभते ।
भावेषु गलिता यस्य शोभनाशोभना मतिः ॥ ९१ ॥

निर्मम इति । धीरो ज्ञानी शोभते दीप्यते यतो निर्ममः, अत एव समलोष्टाश्मकाञ्चनः ज्ञानबलेन सुभिन्नो हृदयग्रन्थिः अहङ्कारो यस्य स तथा, विनिर्धूते रजस्तमसी यस्य सः ॥ ८८ ॥

सर्वत्र इति । सर्वत्र सर्वेषु विषयेषु अनवधानस्य अवधानरहितस्य तथा न किंचिद्वासना हृदि मुक्तात्मनः तृष्णारहितात्मनः अत एव आत्मानन्देन वितृप्तस्य केन तुलना जायते ज्ञानिव्यतिरिक्तस्य ईदृगवस्थाभावादित्यर्थः ॥८९॥

अतुलनामेव विशेषेण विशदयति जानन् इति । निर्वासनात् ज्ञानिनः ऋते अन्यः कः लोकदृष्ट्या मनसा जानन्नपि वस्तुतो न जानाति । तथा चक्षुषा पश्यन्नपि वस्तुतो न पश्यति, ब्रुवन्नपि न च ब्रूते, अत्र त्वाभिमानाभावादित्यर्थः ॥९०॥

भिक्षुः इति । यस्य ज्ञानिनः उत्कृष्टेषु भावेषु शोभना अपकृष्टेषु अशोभनत्वावगाहिनी मतिः गलिता । अतएव यो निष्कामः स भूपतिः जनकादिवत् भिक्षुर्वा याज्ञवल्क्यादिवत् शोभते एव, भावेषु निर्विकल्पत्वात् राज्यं न बन्धायेत्यर्थः ॥९१॥

क्व स्वाच्छन्द्यं क्व सङ्कोचः क्व वा तत्त्वविनिश्चयः ।
निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः ॥८२॥
आत्मविश्रान्तितृप्तेन निराशेन गतार्तिना ।
अन्तर्यदनुभूयेत तत्कथं कस्य कथ्यते ॥ ८३ ॥
सुप्तोऽपि न सुषुप्तौ च स्वप्नेऽपि शयितो न च ।
जागरेऽपि न जागर्ति धीरस्तृप्तः पदेपदे ॥ ८४ ॥
ज्ञः सचिन्तोऽपि निश्चिन्तः सेन्द्रियोऽपि निरिन्द्रियः
सुबुद्धिरपि निर्बुद्धिः साहङ्कारोऽनहङ्कृति ॥८५॥

क्व इति । योगिनः निर्व्याजं निष्कपटं यत् आर्जवं ऋजुबुद्धिस्तद्रूपस्य आत्मनिष्ठत्वात्, चरितार्थस्य पूर्णार्थस्य तस्य अर्थ-नाशो वा अन्यत्र स्वाच्छन्द्यं स्वेच्छाचारित्वं क्व तथा सङ्कोचः प्रवृत्त्यादिसङ्करणं क्व तत्त्वनिश्चयः क्व, कर्तृत्वं वा क्व, कर्तृत्वाध्यासाभावात् ॥ ८२ ॥

आत्मविश्रान्तितृप्तेन इति । आत्मनि विश्रान्त्या स्थित्या तृप्तेन अतएव आशारहितेन अतएव गतार्तिना गतदुःखेन ज्ञानिना यत् अन्तःकरणे अनुभूयेत तत्कथं कं प्रकारं धर्म-माश्रित्य कथ्यते, अकर्तृत्वेव धर्मस्याभावात् कस्य वा अधिकारिणः कथ्यते तादृशाधिकारिणोऽभावादित्यर्थः ॥ ८३ ॥

सुप्तः इति । धीरः सुषुप्तौ न सुप्तः स्वप्नेऽपि शयितो न च जागरेऽपि न जागर्ति, अवस्थात्रयवतो या बुद्धिस्तद्विमुक्तात्मज्ञान-त्वात् । अतएव इदमेवाभिप्रेत्याह पदे पदे इति । यत्र यत्र अविरतं नित्यानन्दानुभवतृप्तः ॥ ८४ ॥

न सुखी न च वा दुःखी न विरक्तो न सङ्गवान्।
न मुमुक्षुर्न वा मुक्तो न किञ्चिन्न च किञ्चन॥९६॥
विक्षेपेऽपि न विक्षिप्तः समाधौ न समाधिमान्।
जाड्येऽपि न जडो धन्यः पाण्डित्येऽपि न पण्डितः॥९७॥
मुक्तो यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतः।
समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतम्॥९८॥
न प्रीयते वन्द्यमानो निन्द्यमानो न कुप्यति।

म: इति। धीरो ज्ञानी लोकदृष्ट्या चिन्तादियुक्तोऽपि वस्तुतस्तद्रहितः, विविक्तात्मदर्शित्वादित्यर्थः॥ ९५॥

न सुखी इति। लोकगत्या सुखीत्यादिरूपोऽपि वस्तुतस्तद्रहितः, अन्तःकरणाध्यासरहितत्वात्, न विरक्तो विषये रागाभावात्, न वा मुक्तः पूर्वमपि बन्धनाभावात् तथा किञ्चिन्न अद्वैतरूपत्वात् तथा किञ्चन न चानिर्वाच्यत्वात्॥ ९६॥

विक्षेपेऽपि इति। धन्यो ज्ञानी लोकदृष्ट्या विक्षेपेऽपि वस्तुतो न विक्षिप्तः, अप्रकाशाध्यासानुभवात्, लोकदृष्ट्या समाधौ प्रतीयमाने अपि न समाधिमान्, कर्तृत्वाध्यासाभावात्, लोकदृष्ट्या जाड्ये प्रतीयमाने अपि न जडः ज्ञानानुभवशालित्वात्, लोकदृष्ट्या पाण्डित्ये प्रतीयमाने अपि न पण्डितः, पण्डितोऽहमित्यभिमानाभावात्॥ ९७॥

मुक्तः इति। मुक्तः प्रारब्धवशात् यथा प्राप्तस्थितौ स्वस्थोऽपि कृतार्थितः तथा कृते पूर्वकृते कर्तव्ये च करिष्यमाणे कर्मणि निर्वृतः सन्तुष्टः अभिनिवेशरहितश्च, अतएव च सर्वत्र समः वैतृष्ण्यात् इदम् अकृतम् इदं च कृतम् इति न स्मरति॥९८॥

नैवोद्विजति मरणे जीवने नाभिनन्दति ॥९९॥

न धावति जनाकीर्णं नारण्यमुपशान्तधीः ।
यथातथा यत्रतत्र सम एवावतिष्ठते ॥ १०० ॥

अथ आत्मविश्रान्त्यष्टकं नामैकोनविंशप्रकरणं प्रारभ्यते।

तत्त्वविज्ञानसन्दंशमादाय हृदयोदरात् ।
नानाविधपरामर्शशल्योद्धारः कृतो मया ॥ १ ॥

न प्रीयते इति। कैश्चित् सज्जनैः वन्द्यमानोऽपि न तुष्यति निन्द्यमानोऽपि न कुप्यति मरणे उपस्थिते सति उद्वेगं न प्राप्नोति, आत्मनो नित्यत्वानुसन्धानात्, अतएव जीवने सति नाभिनन्दति न तुष्यति ॥ ९९ ॥

न धावति इति। उपशान्तधीः पुरुषः जनाकीर्णं प्रदेशं न अनुधावति, न अपि अरण्यं सर्वत्र शान्तत्वात् यथा तथा जनसम्मर्देन तदसम्मर्दप्रकारेण वा यत्र तत्र वने वा पत्तने वा सम एव स्वस्थचित्त एव अवतिष्ठते प्रशान्तस्वभावाकार-त्वात् ॥ १०० ॥

इति शान्तिशतकं नामाष्टादशप्रकरणं समाप्तम्।

साध्यसाधनरूपेण ज्ञाते ज्ञाने गुरोर्मुखात् ।
शिष्यश्चात्मनि विश्रान्तिमलभिः प्राह सस्फुटम् ॥

एवं तत्त्वज्ञानिनः स्वभावभूतां शान्तिं श्रुत्वा कृतार्थतया गुरुं परितोषयितुमात्मविश्रान्त्यष्टकं शिष्यः कथयति तत्त्व-विज्ञानसन्दंशम् इति। हे गुरो! मया भवतः सकाशात् तत्त्व-विज्ञानोपदेशरूपं सन्दंशं चीरकारोपकरणम् आदाय स-

क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता।
क्व द्वैतं क्व च वाऽद्वैतं स्वमहिम्नि स्थितस्य मे ॥२॥
क्व भूतं क्व भविष्यद्वा वर्त्तमानमपि क्व वा।
क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे ॥३॥
क्व चात्मा क्व च वानात्मा क्व शुभं क्वाशुभं तथा।
क्व चिन्ता क्व च वाचिन्ता स्वमहिम्नि स्थितस्य मे ॥४॥
क्व स्वप्नः क्व सुषुप्तिर्वा क्व च जागरणं तथा।

हृदयोदरात् नानाविधपरामर्श एव यत् शल्यं तस्य उद्धारः अपहारः कृतः ॥ १ ॥

एतदेव स्पष्टयति। क्व धर्मः इति। धर्मार्थकामा अपि हृदयोदरान्निरस्ताः क्षयिष्णुत्वादित्यर्थः। स्वमहिम्नि स्थितस्य मे मम विवेकिता क्व, द्वैतं वाऽद्वैतं च क्व, विद्याविश्रान्तस्य विवेकानुपयोगात्, "उत्तीर्णे तु परे पारे नौकायाः किं प्रयोजनम्" इति न्यायात्, द्वैतस्य च ज्ञानबाधितत्वात्, अद्वैतस्य द्वैतमापेक्षत्वेनाप्याभासिकत्वाद्विवेकादयोऽपि मम न सन्तीत्यर्थः ॥ २ ॥

क्व द्वैतमित्युक्तमेव विशेषतः प्रपञ्चयति क्व भूतम् इति। कालस्यापि ममास्फूर्त्तेस्तदुपाधिका भूतभविष्यद्वर्त्तमाना अपि न सन्तीत्यर्थः। नित्यं स्वमहिम्नि स्थितस्य मे देशः अपि नास्तीत्यर्थः ॥ ३ ॥

क्व चात्मा इति। अतति व्याप्नोतीति आत्मा सर्वं व्याप्यमपेक्ष्य कथ्यते, स्वमहिम्नि स्थितस्य च मम आत्मादिकं नास्तीत्यर्थः ॥ ४ ॥

क्व तुरीयं भयं वापि स्वमहिम्नि स्थितस्य मे ॥५॥
क्व दूरं क्व समीपं वा बाह्यं क्वाभ्यन्तरं क्व वा ।
क्व स्थूलं क्व च वा सूक्ष्मं स्वमहिम्नि स्थितस्य मे ॥६॥
क्व मृत्युर्जीवितं वा क्व लोकाः क्वास्य क्व लौकिकम् ।
क्व लयः क्व समाधिर्वा स्वमहिम्नि स्थितस्य मे ॥७॥
अलं त्रिवर्गकथया योगस्य कथयाप्यलम् ।
अलं विज्ञानकथया विश्रान्तस्य ममात्मनि ॥८॥

क्व स्वप्नः इति । स्वप्नादयो बुद्धेरेवावस्था मम न सन्ति, एतत्त्रितयाभावे तं निरूप्य तुरीयावस्थापि मम नास्ति तथा भयादयोऽपि अन्तःकरणधर्मा मम न सन्तीत्यर्थः ॥ ५ ॥

क्व दूरम् इति । सर्वत्र परिपूर्णस्य मम दूरसमीपादिकं नास्ति, पूर्णमात्रदर्शिनो मम स्थूलसूक्ष्मदृष्टिरपि नास्तीत्यर्थः ॥ ६ ॥

क्व मृत्युः इति । कालत्रयेऽपि सद्रूपस्य मम जीवनमरणे न स्तः, पूर्णमात्रदर्शिनोऽस्य मम लोका भूरादयो न सन्ति, लौकिकं कार्य्यमपि नास्ति, पूर्णस्य मम सर्वे लयः क्व च समाधिश्च क्व ॥ ७ ॥

अलम् इति । धर्मार्थकामकथया योगाभ्यासकथया विज्ञानकथया वा अलम् आत्मनि विश्रान्तस्य मम एतैः प्रयोजनाभावादित्यर्थः ॥ ८ ॥

इति आत्मविश्रान्त्यष्टकं नामैकोनविंशतिकप्रकरणम् ।

अथ शिष्यप्रोक्तं जीवन्मुक्तिचतुर्दशकं नाम विंशतिकप्रकरणं प्रारभ्यते।

क्व भूतानि क्व देहो वा क्वेन्द्रियाणि क्व वा मनः।
क्व शून्यं क्व च नैराश्यं मत्स्वरूपे निरञ्जने ॥ १ ॥
क्व शास्त्रं क्वात्मविज्ञानं क्व वा निर्विषयं मनः।
क्व तृप्तिः क्व वितृष्णात्वं गतद्वन्द्वस्य मे सदा ॥२॥
क्व विद्या क्व च वाविद्या क्वाहं क्वेदं मम क्व वा।
क्व बन्धः क्व च वा मोक्षः स्वरूपस्य क्व रूपिता ॥३॥

आत्मविश्रान्त्यभिव्यक्तिस्वभावां मुक्तिशालिनीम्।
जीवन्मुक्तिदशां शिष्यश्चतुर्दशभिरब्रवीत् ॥

प्रागुक्तात्मविश्रान्तेः फलीभूतां विदुषः स्वभावभूतां जीवन्मुक्तिदशां शिष्यश्चतुर्दशश्लोकैर्निरूपयति क्व भूतानि इति। निरञ्जने सर्वोपाधिसम्बन्धशून्ये मत्स्वरूपे भूतदेहेन्द्रियमनांसि क्व, तर्हि किं शून्यमस्ति नेत्याह क्व शून्यम् इति। न हि सदात्मनि सति शून्यं सम्भवतीत्यर्थः। मयि नैराश्यम् अपि स्वाभाविकं न आशानिरूप्यत्वादित्यर्थः ॥ १ ॥

क्व इति। सदा गतद्वन्द्वस्य मे मम शास्त्रं क्व तज्जन्यं विज्ञानं च क्व, आत्मविश्रान्त्या सर्वस्य गलितप्रायत्वात्, निर्विषयं मनः अपि न, तस्यापि गलितप्रायत्वात् अतएव तृप्तिरपि न, तथा तृप्तिसाध्यं वितृष्णचित्तत्वमपि न, चित्तस्यैव गलितप्रायत्वादित्यर्थः ॥ २ ॥

क्व विद्या इति। मयि क्व विद्याद्यहङ्कारधर्माः इदं बाह्यं वस्तुजातं क्व, अहं क्व, मम सम्बन्धः क्व, द्वितीयस्य सम्बन्धिनो

क्व प्रारब्धानि कर्माणि जीवन्मुक्तिरपि क्व वा ।
क्व तद्विदेहकैवल्यं निर्विशेषस्य सर्वदा ॥ ४ ॥
क्व कर्ता क्व च वा भोक्ता निष्क्रियं स्फुरणं क्व वा ।
क्वापरोक्षं फलं वा क्व निःस्वभावस्य मे सदा ॥५॥
क्व लोकः क्व मुमुक्षुर्वा क्व योगी ज्ञानवान् क्व वा ।
क्व बद्धः क्व च वा मुक्तः स्वस्वरूपेऽहमद्वये ॥ ६ ॥
क्व सृष्टिः क्व च संहारः क्व साध्यं क्व च साधनम् ।
क्व साधकः क्व सिद्धिर्वा स्वस्वरूपेऽहमद्वये ॥ ७ ॥
क्व प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमा ।

ऽभावात्, तथा बन्धमोक्षौ अपि धर्मौ क्व, अत्र हेतुमाह स्वरूपस्य इति । निर्विशेषस्वरूपस्य मम रूपिता धर्मवार्त्ता क्व, तथा च निर्धर्मके मयि न विद्यादयोऽपि धर्माः सन्तीति फलितार्थः ॥३

क्व प्रारब्धानि इति । क्व प्रारब्धानि कर्माणि, तथा जीवन्मुक्तिः तथा विदेहकैवल्यम् एते धर्माः सदा निर्विशेषस्य मे न सन्तीत्यर्थः ॥ ४ ॥

क्व कर्ता इति । सदा निःस्वभावस्य मे कर्तृत्वभोक्तृत्वनिष्क्रियस्फुरणानि क्व, अतएव अपरोक्षं वृत्तिरूपं च ज्ञानं क्व, फलं विषयावच्छिन्नं यत् फलं चैतन्यं क्व इत्यर्थः ॥ ५ ॥

क्व लोकः इति । अहम् इत्येवं रूपे अद्वये अहमद्वये आत्माद्वैते स्वस्वरूपे सति लोकः क्व मुमुक्षुः क्व योगी क्व ज्ञानवान् अपि बद्धः क्व मुक्तश्च क्व इत्यर्थः । ६ ॥

क्व सृष्टिः इति । अहमद्वये आत्माद्वैते स्वस्वरूपे सति सृष्टिसंहारौ साध्यसाधने साधकः सिद्धिर्वा क्व । ७ ।

क्व किंचित् क्व न किंचिद्वा सर्वदा विमलस्य मे ॥८॥
क्व विक्षेपः क्व चैकाग्र्यं क्व निर्बोधः क्व मूढता।
क्व हर्षः क्व विषादो वा सर्वदा निष्क्रियस्य मे ॥९॥
क्व चैष व्यवहारो वा क्व च सा परमार्थता।
क्व सुखं क्व च वा दुःखं निर्विमर्शस्य मे सदा ॥१०॥
क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा।
क्व जीवः क्व च तद्ब्रह्म सर्वदा विमलस्य मे ॥११॥
क्व प्रवृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बन्धनम्।
कूटस्थनिर्विभागस्य स्वस्थस्य मम सर्वदा ॥ १२ ॥

क्व प्रमाता इति। सर्वदा विमलस्य उपाधिसम्बन्धमल-शून्यस्य मे प्रमातृप्रमाणप्रमेयप्रमाव्यवस्थाः क्व, मम किंचित् सामान्यतोऽन्यत् पदार्थमात्रं क्व, न च किंचिद्वा क्व, पदार्थ-भावेऽपि मम क्व, सर्वथा सम्बन्धशून्यत्वादित्यर्थः ॥ ८ ॥

क्व विक्षेप इति। सर्वदा निष्क्रियस्य मे विक्षेपादिका क्रिया क्व इत्यर्थः ॥ ९ ॥

क्व चैष इति। सदा निर्विमर्शस्य विवेकतो वृत्तिज्ञान-शून्यस्य व्यवहारो व्यावहारिकपदार्थज्ञानं क्व, परमार्थताज्ञानं क्व, सुखदुःखादिकमपि क्व इत्यर्थः ॥ १० ॥

क्व माया इति। सर्वदा विमलस्य उपाधिमलशून्यस्य मे मायासंसारौ प्रीतिर्विरतिश्च वैराग्यं क्व, जीवभावो ब्रह्मभावश्च क्व, कार्योपाध्यभावे जीवत्वस्य ब्रह्मभावत्वादुपाध्यभावकल्पना-भावे ब्रह्मत्वस्य च [illegible] इत्यर्थः ॥ ११ ॥

क्व प्रवृत्तिः इति। कूटस्थस्य निष्क्रियस्य तथा निर्विभागस्य

क्वोपदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः।
क्व चास्ति पुरुषार्थो वा निरुपाधेः शिवस्य मे ॥१३॥

क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयम्।
बहुनात्र किमुक्तेन किञ्चिन्नोत्तिष्ठते मम ॥ १४ ॥

अथ संख्याक्रमव्याख्यानं नामैकविंशतितमप्रकरणं प्रारभ्यते।

दश षट् चोपदेशे स्युः श्लोकाश्च पञ्चविंशतिः।
सत्यात्मानुभवोल्लासे उपदेशे चतुर्दश ॥ १ ॥

भेदरहितस्य सर्वदा स्वस्थस्य मम प्रवृत्तिनिवृत्ती क्व, मुक्तिबन्धने च क्व इत्यर्थः ॥ १२ ॥

क्व उपदेशः इति। निरुपाधेः उपाधिशून्यस्य तथा शिवस्य नित्यानन्दस्वरूपस्य उपदेशक्रिया क्व, उपदेशकं शास्त्रं च क्व, मायाद्युपाध्यभावे तत्कृतोपदेशस्य चाभावात्। अतएव शिष्यः गुरुश्च क्व, स्वयं शिवस्वरूपस्य च पुरुषार्थो वा क्व चास्ति ॥१३॥

जीवन्मुक्तदशामुपसंहरति क्व चास्ति इति। मम अस्ति इति न स्फुरति। असत्त्वापेक्षत्वात् सत्त्वस्य, तथा नास्ति इत्यपि न स्फुरति सत्त्वापेक्षत्वान्नास्तित्वस्य, अतएव मिथः सापेक्षत्वात् ऐकत्वद्वित्वेऽपि मम न स्तः, प्रत्येकं व्यक्तिभेदेन निर्विवक्तुं कल्पकोटिभिरपि वक्तुमशक्यत्वात्। सामान्यत आह बहुना इति। बहुना उक्तेन किं प्रयोजनं मम चिदेकरूपस्य किञ्चिदपि न उत्तिष्ठते न प्रकाशत इत्यर्थः ॥ १४ ॥

इति जीवन्मुक्तिचतुर्दशकं नाम विंशतिप्रकरणम्।

विंशे तुरीयैकत्वमुद्दिश्य पञ्चकत्रयम्।
जीवन्मुक्तौ पुरस्तात्र मात्रानुक्रमणीं स्फुटाम्॥

षडुल्लासे लये चैवोपदेशे च चतुश्चतुः ।
पञ्चकं स्यादनुभवे बन्धमोक्षे चतुष्ककम् ॥ २ ॥
निर्वेदोपशमे ज्ञाने एवमेवाष्टकं भवेत् ।
यथासुखे सप्तकं च शान्तौ स्याद्वेदसम्मितम् ॥ ३ ॥
तत्त्वोपदेशे विंशच्च दश ज्ञानोपदेशके ।
तत्त्वस्वरूपे विंशच्च शमे च शतकं भवेत् ॥ ४ ॥

दश षट् इति । षट् दश षोडश श्लोकाः गुरूपदेशे स्युः, अस्मिन् प्रथमे प्रकरणे पञ्चविंशतिः श्लोकाः शिष्योक्तानुभवोल्लासे द्वितीयप्रकरणे स्युः चतुर्दश श्लोकाः पुनर्गुरुणाऽऽक्षेपमुद्रयोक्तोपदेशाख्ये तृतीयप्रकरणे स्युः ॥ १ ॥

षट् उल्लासे इति । षट् श्लोकाः शिष्यप्रोक्तानुभवोल्लासे चतुर्थप्रकरणे स्युः, चत्वारः श्लोका गुरुप्रोक्ते लयाख्ये पञ्चमे प्रकरणे स्युः, पुनश्चत्वारः श्लोका गुरुप्रोक्ते प्रतिवादिविलक्षणनिषेधोपदेशाख्ये षष्ठे प्रकरणे स्युः, श्लोकानां पञ्चकं शिष्यप्रोक्तेऽनुभवाख्ये सप्तमे प्रकरणे स्यात् । श्लोकानां चतुष्कं गुरुप्रोक्ते बन्धमोक्षेऽष्टमे प्रकरणे स्यात् ॥ २ ॥

निर्वेदोपशमे इति । श्लोकाष्टकं गुरुप्रोक्ते निर्वेदाख्ये नवमे प्रकरणे स्यात्, गुरुप्रोक्तमुपशमाष्टकं नाम दशमं प्रकरणम्, गुरुप्रोक्तं ज्ञानाष्टकं नामैकादशं प्रकरणम्, शिष्यप्रोक्तम् एवमेवाष्टकं नाम द्वादशं प्रकरणम्, शिष्यप्रोक्तं यथासुखसप्तकं नाम त्रयोदशं प्रकरणम्, शिष्यप्रोक्तं शान्तिचतुष्कं नाम चतुर्दशं प्रकरणम् ॥ ३ ॥

तत्त्वोपदेशे इति । विंशति श्लोका गुरुप्रोक्ते तत्त्वोपदे-

अष्टकं चात्मविश्रान्तौ जीवन्मुक्तौ चतुर्दश ।
षट् संख्याक्रमविज्ञाने ग्रन्थैकात्म्यं ततः परम् ॥५॥
विंशत्येकमितैः खण्डैः श्लोकैरात्माग्निमध्यगैः ।
अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी ॥६॥

शाख्ये पञ्चदशे प्रकरणे स्युः, दश श्लोका गुरुप्रोक्ते विशेषोपदेशाख्ये षोडशे प्रकरणे स्युः, विंशति श्लोका गुरुप्रोक्तास्तत्त्वस्वरूपोपदेशाख्ये सप्तदशे प्रकरणे स्युः, गुरुप्रोक्तं शमशतकं नाम अष्टादशं प्रकरणम् ॥ ४ ॥


अष्टकं च इति । शिष्यप्रोक्तमात्मविश्रान्त्यष्टकं नाम एकोनविंशतिकं प्रकरणम् शिष्यप्रोक्तं जीवन्मुक्तिचतुर्दशकं नाम विंशतिकं प्रकरणम्, गुरुप्रोक्तं संख्याक्रमकथनं नामैकविंशतिकं प्रकरणम् । अतःपरं विंशत्येकमितैः खण्डैः श्लोकैर्ग्रन्थैकात्म्यं संख्याग्रन्थखण्डानां चैकात्म्यं समूहरूपतयैकात्मत्वमित्यर्थः ॥ ५ ॥

विंशत्येकमितैः इति । कियद्भिः खण्डैः विंशत्येकमितैः एकविंशतिखण्डैरित्यर्थः । कियद्भिः श्लोकैः आत्माग्निमध्यगैः जीवात्मपरमात्मभेदभिन्नावात्मानौ द्वौ, अग्नयस्त्रयः मध्ये खं च मध्ये शून्यम् । अङ्कानां वामतो गतिरिति न्यायात् अन्ते द्वौ मध्ये खम् आदौ च त्रयं ३०२ इत्यधिकैस्त्रिशतश्लोकैरित्यर्थः ।

श्लोकसंख्यामुपसंहरति अवधूत इति । अवधूतानुभूतिरूपोऽयं ग्रन्थस्तस्य संख्याक्रमो विद्यते येषु ते संख्याक्रमा ईदृशाः श्लोका अमी कथिता इत्यर्थः ॥ ६ ॥

इति संख्याक्रमव्याख्यानं नामैकविंशतिप्रकरणम् ।

समाप्ता इयमष्टावक्रसंहिता ।



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDITA-KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.